अस्य पिण्डगोपालमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, श्रीकृष्णः परमात्मा देवता; गं बीजं, औं शक्तिः, श्रीकृष्णप्रीत्यर्थे विनियोगः ।

End :

ध्यानम्—

कदम्बमूले क्रीडन्तं बृन्दावननिवासिनम्।
पद्मोपरि स्थितं देवं वेणुगायं तमच्युतम् ॥

* * * *

मयूरपिञ्छसंयुक्तं सर्वाभरणभूषितम्।
गोपीभिर्गोपगोबृन्दैस्सेवितं कृष्णमर्चयेत् ॥

मन्त्रः—

ग्लौं । लक्षचतुष्ट(य)जपपुरश्चरणम् । आज्येन दशांशहोमः ॥

No. **6618.** पिण्डगोपालमन्त्रः.

PIṆḌAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 242*b* of the MS. described under No. 581.

Complete.

Same as the above.

No. **6619.** पिण्डगोपालमन्त्रः.

PIṆḌAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 285*b* of the MS. described under No. 5477.

Complete

Same as the above.

No. **6620.** पुण्डरीकाक्षमन्त्रः.

PUṆḌARĪKĀKṢAMANTRAḤ.

Pages, 2. Lines, 17 on a page.

Begins on fol. 309*b* of the MS. described under No. 2373.

Complete.

This Mantra is addressed to Viṣṇu and is believed to have the power to cure all sorts of diseases affecting the eye.

Beginning :

अस्य श्री पुण्डरीकाक्षमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीपुण्डरीकाक्षो देवता, क्लीं बीजं, श्रीं शक्तिः, श्रीपुण्डरीकाक्षप्रसादसिद्ध्यर्थे सकलनेत्रबाधानिवृत्त्यर्थे विनियोगः । श्रामित्यादिन्यासः ।

End :

मन्त्रः—क्लीं श्रीं पुण्डरीकाक्षाय नमः । लक्षं जपः इति ॥

No. **6621.** पुत्रकामेष्टिसौभरिमन्त्रः.

PUTRAKĀMĒṢṬISAUBHARIMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 92*b* of the MS. described under No. 5566.

Complete.

The proper repetition of this Mantra is understood to enable one to obtain good children. It is stated in the Śrībhāgavata that a certain ascetic named Saubhari begot many children by the repetition of this Mantra.

Beginning :

अस्य श्रीपुत्रकामेष्टिसौभरिमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, पुत्रकामेष्टिब्रह्मा देवता; ओं बीजं, स्वाहा शक्तिः, मम सुपुत्रावाप्त्यर्थे विनियोगः.

End :

मन्त्रः—

ओन्नमो भगवते ब्रह्मणे वेधसे अष्टौ मे पुत्रा जायन्तामक्षीणरेतसे प्रजापतये स्वाहा ॥

पुनश्चर्या ४४०४ । दशांशहोमतर्पणानि ॥

No. 6622. पुत्रकामेष्टिसौभरिमन्त्रः.

PUTRAKĀMEṢṬISAUBHARIMANTRAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol. 240*b* of the MS. described under No. 581.

Complete.

Same as the above.

No. 6623. पुत्रकामेष्टिसौभरिमन्त्रः.

PUTRAKĀMEṢṬISAUBHARIMANTRAḤ.

Pages, 2. Lines, 17 on a page.

Begins on fol. 283*b* of the MS. described under No. 5477.

Complete.

Same as the above.

No. 6624. पुत्रप्रसादगौरीमन्त्रः.

PUTRAPRASĀDAGAURĪMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 42*b* of the MS. described under No. 235.

Complete.

This Mantra is held to be efficacious in enabling one to obtain children, and is addressed to the goddess Pārvatī.

Beginning:

अस्य श्रीपुत्रप्रसादगौरीमन्त्रस्य कैलासयात्राप्रतिनिवृत्तश्रीकृष्ण ऋषिः, अनुष्टुप् छन्दः, कुमारहस्तपुत्रगौरी देवता; ह्रीं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, मम पुत्रलाभार्थे जपे विनियोगः।

End:

ओं ऌं ऌं ब्लूं ह्रीं श्रीं क्लीं श्रीं गौर्यै स्वाहा। लक्षजपः। क्षीरान्नहोमः। ब्राह्मणभोजनम्॥

No. 6625. पुरन्दरपञ्चमुखहनुमन्मन्त्रः.

PURANDARAPAÑCAMUKHAHANUMANMANTRAḤ.

Pages, 5. Lines, 17 on a page.

Begins on fol. 316*b* of the MS. described under No. 5477.

Complete.

This Mantra is addressed to Hanumat who is conceived here as the destroyer of Laṅkā and as having a big face; and its repetition is believed to secure protection to one by driving off thieves, cruel animals and evil spirits and by preventing the dangers that may possibly come from the various quarters.

Beginning:

अस्य श्रीपुरन्दरपञ्चमुखहनुमन्मन्त्रस्य शौनक ऋषिः, अतिजगती छन्दः, मारुतिर्देवता, मारुतात्मज इति बीजं, अञ्जनासूनुरिति शक्तिः, वायुपुत्र इति कीलकं, मम इष्टार्थे विनियोगः.

End:

चोरव्याघ्रपिशाचोरगब्रह्मराक्षसशाकिनीडाकिनीवेतालानुच्चाटयः उच्चाटय मां रक्ष रक्ष अन्तरिक्षदिशं बन्धय बन्धय स्वाहा ॥

तारं हरिपदश्चैव मर्कटी मर्कटाय च ।
स्वाहान्तको मनुरयं द्वादशार्णस्सुसिद्धिदः ॥
वर्णस्य दशसाहस्रं जपेन्मन्त्रं यथाक्रमम् ॥

No. 6626. पुरश्चर्यासङ्कल्पः.

PURAŚCARYĀSAṄKALPAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 40*b* of the MS. described under No. 5864.

Complete.

On certain essential preliminary details of ceremonial to be observed before the commencement of the repetition of Mantras in general.

Beginning:

एवं . . तिथौ . . अस्माकं सहकुटुम्बानां . . पुरुषार्थ-फलसिद्ध्यर्थं.

End:

तन्मन्त्रोपासनाङ्गद्वारा पुरश्चरणमहङ्करिष्ये—इति सङ्कल्प्य नित्य-विधिं यथाशक्तिजपं तन्मत्रोपासनाङ्गहोमं करिष्ये ॥

जपतद्दशांशं होमः। होमदशांशं तर्पणम् ।
तर्पणतद्दशांशं मार्जनम् । तद्दशांशं ब्राह्मणभोजनम ॥

No. **6627.** पुरुषसूक्तमन्त्रः.

PURUṢASŪKTAMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 7*b* of the MS. described under No. 5786.

Complete.

This Mantra is a well-known Vedic hymn in praise of Puruṣa understood to be Nārāyaṇa.

Beginning :

अथ पुरुषसूक्तमन्त्रः—

ओमिति प्राणायामः १२ . . .

अस्य श्रीपुरुषसूक्तमन्त्रस्य अन्तर्यामी ऋषिः, अनुष्टुप् छन्दः, अन्त्या त्रिष्टुप् छन्दः, पुरुषनामकश्रीनारायणो देवता ; श्रीनारायणप्रेरणया श्रीनारायणप्रीत्यर्थे पुरुषसूक्तमन्त्रजपे विनियोगः ।

End :

पुरुषनामकश्रीलक्ष्मीनारायणप्रेरणया श्रीलक्ष्मीनारायणप्रीत्यर्थं पुरुषसूक्तमन्त्रजपङ्करिष्ये ।

सहस्रशीर्षा पुरुष इत्यारभ्य यत्र पूर्वे साध्यास्सन्ति देवाः इत्यन्तं जपः । उपसंहारः पूर्ववत् ॥

No. **6628.** पुळिन्दिनीमन्त्रः.

PULINDINĪMANTRAḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 45*a* of the MS. described under No. 2886.

Complete.

This Mantra is addressed to Pārvatī; and it is believed that, if a person goes to sleep after having duly repeated this Mantra 108 times, the goddess Pārvatī will reveal to him in his dreams all that he desires to know. The Puranic story involved in the name Pulindinī is that Śiva and Pārvatī assumed the disguise of mountaineers to test the faith of Arjuna when he was undergoing penance for obtaining the Pāśupatāstra.

Beginning:

पुळिन्दिन्याः शङ्करः, जगती, पुळिन्दिनी, रं बीजं, स्वाहा शक्तिः, पु—गः ।

End:

सर्वं पूर्ववत् ।

कार्याकार्यविवेकार्थं रात्रावष्टोत्तरं शतम् ।
जप्त्वा शयीत तत्तस्य स्वप्ने वदति साम्बिका ॥

No. 6629. पूतनास्तनपातृगोपालमन्त्रः.

PŪTANĀSTANAPĀTṚGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 44*a* of the MS. described under No. 5885.

Complete.

This Mantra is addressed to Kṛṣṇa, conceived as a young child suckling Pūtanā. Kaṁsa sent Pūtanā to give poisoned milk to Kṛṣṇa; and the divine child, Kṛṣṇa, knowing this evil design, sucked her life out of her.

Beginning:

अस्य श्रीपूतनास्तनपातृगोपालमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, पूतनास्तनपातृगोपालो देवता, ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, श्रीपूतनास्तनपातृगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं कृष्णाय हुं फट् स्वाहा । इति मनुः ॥

No. 6630. पूर्णगिरिपीठमन्त्रः.
PŪRṆAGIRIPĪṬHAMANTRAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 18*a* of the MS. described under No. 2848.

Complete.

This Mantra is intended to propitiate Nārāyaṇī who is the presiding goddess of the Pūrṇagiripīṭha and is conceived to be a manifestation of Śakti.

Beginning:

अस्य श्रीपूर्णगिरिपीठमहामन्त्रस्य विष्णुः ऋषिः, अनुष्टुप् छन्दः, श्रीपूर्णगिरिपीठशक्तिनारायणी देवता; ऐं बीजं, श्रीं शक्तिः, ह्रीं कीलकं, मम श्रीपूर्णगिरिपीठशक्तिनारायणीप्रसादसिद्ध्यर्थे विनियोगः ।

End:

ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीपूर्णगिरिपीठशक्तिनारायणीश्रीपादुकां पूजयामि ॥

No. 6631. पूर्णगिरिपीठमन्त्रः.
PŪRṆAGIRIPĪṬHAMANTRAḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 2*b* of the MS. described under No. 5673.

Complete.

Same as the above.

No. 6632. पूर्णगिरिपीठमन्त्रः.
PŪRṆAGIRIPĪṬHAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 29*b* of the MS. described under No. 124.

Complete.

Same as the above.

No. 6633. पूर्वषोढान्यासः.
PŪRVAṢŌḌHĀNYĀSAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 45*a* of the MS. described under No. 673.

Complete.

On the ceremonial touching of certain parts of the body, uttering at the same time the names of the several divine seats of the goddess Śakti along with the appropriate letters of the alphabet denoting those seats.

Beginning :

अथ पीठन्यासः—

धरापीठानि पञ्चाशत्त्रिपुराधिष्ठितानि वै ।
स्वामी तीर्थान्यसंसिद्धौ पूजा न फलहेतवे(?) ॥
सितासितारुणश्यामहरिपीतान्यनुक्रमात् ।
पुनः पुनः क्रमाद्देवि पञ्चाशत्पीठसञ्चयः ॥
पीठानि संस्मरेद्विद्वान् सर्वमातृकया सह ।

इति ध्यात्वा न्यसेत् । ओं अं कामरूपपीठाय नमः । ओं आं वाराणसीपीठाय नमः ।

End :

सं महालक्ष्मीपीठाय नमः । हं महोड्याणपीठाय नमः । क्षं छत्र-पीठाय नमः । इति बहिर्मातृकास्थानेषु न्यसेत् । ऐं क्लीं सौः, सौः क्लीं ऐं । गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीदेवता[यै]श्रीमहात्रिपुरसुन्दरी-श्रीपादुकां पूजयामि नमः ॥

Colophon :

इति पूर्वषोढान्यासः ॥

No. **6634.** प्रचण्डभैरवदिग्बन्धनम्.

PRACAṆḌABHAIRAVADIGBANDHANAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 214*a* of the MS. described under No. 5661.

Complete.

This Mantra is addressed to Bhairava, and is intended to secure protection to the supplicant from dangers arising from kings, thieves, fire, serpents, wild animals and evil spirits, and also from dangers proceeding from the various quarters.

Beginning:

अस्य श्रीप्रचण्डभैरवादिग्बन्धनमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, महाभैरवो देवता; क्ष्रां बीजं, प्रचण्डभैरवेति शक्तिः, क्रों कीलकं, मम शरीररक्षणार्थे विनियोगः ।

End:

महावज्रकवचास्त्राय राजचोराग्निसर्पसिंहव्याघ्रभल्लूकभूतप्रेतपिशाचब्रह्मराक्षसादिसर्वोपद्रवान् नाशय नाशय हुं फट् स्वाहा ॥

Colophon:

(प्रचण्ड)भैरवदिग्बन्धनं सम्पूर्णम् ॥

No. 6635. प्रणवपञ्चाक्षरीमन्त्रः.

PRAṆAVAPAÑCĀKṢARĪMANTRAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 14*a* of the MS. described under No. 3862.

Complete.

This Mantra is intended to please Śiva and Śakti, and consists of 5 syllables. It is called Praṇavapañcākṣarī, because the syllable Ôm (Praṇava) which occurs twice here forms part of the Mantra, while in the ordinary Pañcākṣarī-mantra Ôm is not to be taken as forming part of the Mantra.

Beginning:

अस्य श्रीप्रणवपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, साम्बसदाशिवो देवता; ओं बीजं, नं शक्तिः, साम्बसदाशिवायेति कीलकं, गुरुसाम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ।

End:

ओं क्रों क्ष्मीं क्लीं ओं नमश्शिवाय । लं पृथिवीतत्त्वात्मने गन्धं स । वं वायुतत्त्वात्मने पुष्पं स । अं अमृततत्त्वात्मने अमृतनैवेद्यं समर्पयामि । सं सर्वात्मने सर्वोपचारपूजां समर्पयामि । यस्य स्मृत्या च ॥ साम्बशिवस्सुप्रीतो वरदो भवतु ॥

No. 6636. प्रणवपञ्चाक्षरीमन्त्रः.

PRAṆAVAPAÑCĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 217.

Complete.

Similar to the above.

The Mantra proper is not given in this manuscript.

Beginning :

अस्य श्रीप्रणवपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीकालाग्निरुद्रो देवता, प्रणवपञ्चाक्षरीजपे विनियोगः ।

End :

भक्तिश्च मुक्तिमपि भक्तजनाय दातुं
शक्तं विविक्तमघसङ्घविघातदक्षम् ।
पञ्चवक्त्रस्य यः श्लोकपञ्चकं नियतः पठेत् ।
प्रभाते पठते भक्त्या स भक्तः प्रमथो भवेत् ॥

No. 6637. प्रणवमन्त्रः.

PRAṆAVAMANTRAḤ.

Pages, 2. Lines, 7 on page.

Begins on fol. 4*b* of the MS. described under No. 5786.

Complete.

This Mantra consists of the syllable ओं, and is intended to propitiate Lakṣmīnārāyaṇa.

Beginning :

अथ प्रणवमन्त्रः—

ओमिति प्राणायामः १२. . . . .

अस्य श्रीप्रणवमन्त्रस्य अन्तर्यामी ऋषिः, देवी गायत्री छन्दः, परमात्मा श्रीलक्ष्मीनारायणो देवता; श्रीलक्ष्मीनारायणप्रेरणया लक्ष्मी-नारायणप्रीत्यर्थं प्रणवमन्त्रजप विनियोगः ।

End:

श्रीलक्ष्मीनारायणप्रेरणया लक्ष्मीनारायणप्रीत्यर्थं यथाशक्ति नियमेन प्रणवमन्त्रजपङ्करिष्ये । ओं इति जपः, पुनः प्राणायामः, उपसंहारः पूर्ववत् ॥

No. **6638.** प्रतापसुन्दरीमन्त्रः.

PRATĀPASUNDARĪMANTRAḤ.

Pages, 2. Lines, 17 on a page.

Begins on fol. 302*b* of the MS. described under No. 5477.

Complete.

The administration of a certain drug accompanied by the due repetition of this Mantra is believed to have the power to make persons become favourably disposed towards one.

Beginning:

अन्दिसन्दिमोहिनि प्रतापसुन्दरि त्रैरूपिणि ह्रीं स्वाहा । दशलक्षं पुनश्चरणम् ।

End:

एतेन मन्त्रेण अष्टादशवारं मन्त्रयित्वा, क्षीरेण मिश्रं कृत्वा, पाययित्वा, मरणान्तिकं वश्यं भवति । अनपायिन्यास्स्त्रियाः न देयम् । इति ॥

No. **6639.** प्रतापहनूमन्मन्त्रः.

PRATĀPAHANŪMANMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 62*a* of the MS. described under No. 5660.

Complete.

This Mantra is addressed to Hanumat, and is intended to enable one to accomplish one's desires.

Beginning:

अस्य श्रीप्रतापहनूमन्महामन्त्रस्य ईश्वर ऋषिः; अनुष्टुप् छन्दः, श्रीप्रतापहनूमान् देवता ; ओं बीजं, स्वाहा शक्तिः, ह्रीं ह्रीं ह्रीं कीलकं, मम मानसाभीष्टसिद्ध्यर्थे प्रतापहनूमत्प्रीत्यर्थे जपे विनियोगः ।

End:

मूलमन्त्रः। ओं रामदूताय स्वाहा॥

No. **6640.** प्रतापहनूमन्मालामन्त्रः.

PRATĀPAHANŪMANMĀLĀMANTRAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 5660.

Complete.

This Mantra is addressed to Hanumat, and its proper repetition is believed to enable one to destroy one's enemies, to remove fears arising from kings and thieves, and to counteract the evil effects of hostile Mantras, Tantras, etc.

Beginning:

अस्य श्रीप्रतापहनुमदष्टाक्षरीमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीआञ्जनेयो देवता ; ओं बीजं, स्वाहा शक्तिः, ओं कीलकं श्री आञ्जनेयप्रसादसिद्ध्यर्थे जपे विनियोगः।

* * * *

मूलमन्त्रः —

ओं लां लां लां लां घं लां लां घां घां घं घं घं घ्रां णां णां णां णां णां णां मां मां मां मां मां मां रं रं ह्रीं ह्रीं ह्रीं ओं नमो भगवते आञ्जनेयाय नमः।

End:

राजचोरभयं प्रशमय प्रशमय परमन्त्रपरयन्त्रपरतन्त्राञ्छेदय छेदय भेदय भेदय स्वमन्त्रस्वयन्त्रस्वतन्त्रसर्वविद्याः प्रकटय प्रकटय स्वारिष्टशमनाय सर्वशत्रुसंहरणाय परयन्त्रपरमन्त्रपरतन्त्राणि नाशय नाशय असाध्यसाधकाय हुं फट् स्वाहा॥

Colophon:

इति प्रतापहनुमन्मालामन्त्रः समाप्तः॥

No. 6641. प्रतिक्रियाशूलिनीदिग्बन्धनमालामन्त्रः.

PRATIKRIYĀŚŪLINĪDIGBANDHANAMĀLĀ-MANTRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 9*b* of the MS. described under No. 6025.

Complete.

This Mantra is addressed to Durgā and is believed to have the power to safeguard the supplicant from the dangers coming from the various quarters. She is called Pratikriyāśūlinī because she has the Śūla in her hand and counteracts therewith the evil effects of the enemies' hostility.

Beginning:

अस्य श्रीप्रतिक्रियाशूलिनीदिग्बन्धनमालामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, दुर्गाम्बा देवता; दुं बीजं, स्वाहा शक्तिः, मम दिग्बन्धनार्थे जपे विनियोगः।

End:

ओं नमो भगवति उन्मत्तभैरवसहिते वाराहीश्वरि वरुणदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वग्रहोच्चाटनं कुरु कुरु ओं लं ह्रीं फट् स्वाहा ॥

No. 6642. प्रतिक्रियाशूलिनीदुर्गाविद्यामन्त्रः.

PRATIKRIYĀŚŪLINĪDURGĀVIDYĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 6025.

Complete.

This Mantra is addressed to the goddess Durgā, and it is believed to have the power to counteract the harm caused by evil spirits.

Beginning:

अस्य श्रीप्रतिक्रियाशूलिनीदुर्गाविद्यामहामन्त्रस्य ब्रह्मा ऋषिः; गायत्री छन्दः, प्रतिक्रियाशूलिनीदुर्गाम्बा देवता, दुं बीजं, स्वाहा शक्तिः, फट् कीलकं, मम प्रतिक्रियाशूलिनीदुर्गाम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

End :

पञ्चपूजां कुर्यात् । अथ मनुः—

स्वाहा ज्वल ज्वल दुष्टग्रहशूलिनि हुं फट् ॥

No. **6643.** प्रतिक्रियाशूलिनीमन्त्रः.

PRATIKRIYĀŚŪLINĪMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 16*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning :

प्रतिक्रियाशूलिनीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, प्रतिक्रियाशूलिनी देवता ; हुं बीजं, स्वाहा शक्तिः, प्रतिक्रियाशूलिनीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ह्रैं स्रैं ह्रैं अरिदुरितमोचनरूपेण ज्वल ज्वल प्रतिक्रिया ॥

No. **6644.** प्रतिक्रियाशूलिनीमन्त्रः.

PRATIKRIYĀŚŪLINĪMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 5832.

Complete.

Similar to the above.

Beginning :

अस्य श्रीप्रतिक्रियामन्त्रस्य ईश्वर ऋषिः, गायत्री छन्दः, श्रीप्रतिक्रियाशूलिनी देवता ; ह्रां बीजं ह्रीं, शक्तिः, ह्रूं कीलकं, मम प्रतिक्रियाशूलिनीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ओं दुं ह्रीं नमो ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा। इति यथाशक्ति जपं कुर्यात्। ततः पुनर्न्यासादिकं कुर्यात् ॥

No. 6645. प्रत्यङ्गिराकवचः.
PRATYAṄGIRĀKAVACAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 132*a* of the MS. described under No. 1039.

Complete as found in the Śrīmahālakṣmītantra.

This Mantra is addressed to the goddess Pratyaṅgirā, and is intended to secure protection from all dangers.

Beginning:

देवदेव महादेव सर्वज्ञ करुणानिधे।
प्रत्यङ्गिरायाः कवचमृङ्मन्त्रस्य स्वरूपिणी ॥

* * * *

श्रीशिव उवाच—

श्रृणु कल्याणि वक्ष्यामि कवचं शत्रुनिग्रहम्।
परप्रेषितकर्मादितन्त्रशल्यादिभक्षणम् ॥

* * * *

याङ्कल्पयन्ती प्रदिशं रक्षेत्काली त्वथर्वणी।
रक्षेत्कण्ठवत्य(मथ)ग्नेयी सदा मां सिंहवाहिनी ॥

End:

शिष्याय भक्तियुक्ताय वक्तव्या नान्यमे(थै) हि।
निकुम्भिला(त्वि)न्द्रजिता कृतं(ता) जयविवृद्धये ॥

Colophon:

इति श्रीमहालक्ष्मीतन्त्रे आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे प्रत्याङ्गिराकवचं सम्पूर्णम् ॥

No. 6646. प्रत्यङ्गिराकवचः.
PRATYAṄGIRĀKAVACAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 26*a* of the MS. described under No. 5858.

Complete as found in the Atharvaṇamūla.

Similar to the above.

Beginning:

देव्युवाच—

पूर्वतः पातु कृष्णाङ्गी आग्नेय्यामग्निलोचना ।
याम्ये तु कृष्ण(व)स्त्राढ्या नैरृत्यां सिंहवाहनी ॥

End:

सर्वशक्तिसमन्विते प्रत्यङ्गिरे मां रक्ष रक्ष भयेभ्यो हुं फट् स्वाहा ॥

एतैर्मन्त्रविधैर्युक्तं कवचं सर्वकामदम् ।
कवचन्देवतापूज्यं कवचं भयनाशनम् ॥

* * * *

अष्टकष्टमहारोगान् कवचश्चारु नश्यति (नाशयेत्) ।
कवचश्चै(स्यै)व योगेन नाना रोगं (गो)विनश्यति ॥

Colophon:

इत्यथर्वणमूले प्रत्यङ्गिराकवचं सम्पूर्णम् ॥

No. 6647. प्रत्यङ्गिरादिग्बन्धनम्.
PRATYAṄGIRĀDIGBANDHANAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5852.

Complete.

This Mantra is also addressed to the goddess Pratyaṅgirā, and is supposed to have the power to enable one to drive off evil spirits and to secure protection from dangers coming from the various quarters.

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ . . . (ए)तस्या[या]ः शरीरे वर्तमानवर्तिष्यमाणसमस्तभूतप्रेतपिशाचाच्चोटनार्थं . . . . प्रत्यङ्गिरापरमेश्वरीप्रसादसिद्ध्यर्थं दिग्बन्धनपूर्वं . . . . . . अष्टोत्तरपञ्चदशमूलमन्त्रजपं करिष्ये ; तच्छंयोरावृणीमहे शान्तिः ।

अस्य श्रीप्रत्यङ्गिरादिग्बन्धनमहामन्त्रस्य मरीचिपुत्रकश्यप ऋषिः, प्रत्यङ्गिराम्य(द्या)इन्द्रादयो लोकपाला देवता ; क्षां बीजं, क्षीं शक्तिः, क्षूं कीलकं, मम शरीरग्रहग्रहोच्चाटनार्थे प्रत्यङ्गिराप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

यां कल्पयन्ति . . . मृच्छतु । अव ब्रह्मद्विषो जहि । खट्. फट् जहि . . षो(शो)णितम् । एवं शोषय मारय स्वाहा ॥

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥

* * * *

हक(न) हक(न) हुम्फट् स्वाहा ॥

No. **6648.** प्रत्यङ्गिरादिग्बन्धनम्.

PRATYAṄGIRĀDIGBANDHANAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 5352

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

कुबेराय नमः—कुबेरदिग्भागं बन्धयामि। ईशानदिग्भागस्य ईशानो देवता। ईशानाय नमः—तमीशानं—व्याप्तये स्वाहा॥

No. **6649.** प्रत्यङ्गिरादिग्बन्धनम्.

PRATYAṄGIRĀDIGBANDHANAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 5858.

Complete.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम सर्वाभीष्टफलसिद्ध्यर्थे प्रत्याङ्गिरामन्त्रजपङ्कारिष्ये। तच्छंयोरित्यस्य मन्त्रस्य बार्हस्पत्यशंयु ऋषिः, विश्वे देवा देवता, शक्करी छन्दः, शान्त्यर्थे जपे विनियोगः। तच्छंयोरा- . . . करोमि। भद्रं कर्णे . . दधातु। सꣳसमिद्युवसे . . भर।

* * * *

अस्य श्रीप्रत्याङ्गिरादिग्बन्धनमहामन्त्रस्य अतिच्छन्दश्छन्दास्त्रिष्टुभ्यां (जगतीत्रिष्टुभौ) छन्दः, इन्द्रादयो लोकपाला देवता। अत्र स्थले पूर्वदिग्भागे इन्द्रं बन्धयामि। इन्द्रं वो विश्वतः . . . केवलः। लं इन्द्राय नमः। इन्द्रस्सुप्रीतो वरदो भवतु।

End:

आं ह्रीं क्रों हुं फट् ई ईशानाय नमः। ईशानदिशं बन्धयामि। ओं शान्तिश्शान्तिश्शान्तिः॥

No. 6650. प्रत्यङ्गिरापरमेश्वरीमूलविद्यामहामन्त्रः. PRATYAṄGIRĀPARAMĒŚVARĪMŪLAVIDYĀ-MAHĀMATRAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 5858.

Complete.

This Mantra is addressed to the goddess Pratyaṅgirāparamēśvarī, and is intended to nullify the efforts of enemies who covet another's property, etc.

Beginning:

अस्य श्रीप्रत्याङ्गिरापरमेश्वरीमूलविद्यामहामन्त्रस्य आङ्गिरस ऋषिः, प्रत्याङ्गिरा परमेश्वरी देवता ; आं बीजं, ह्रीं शक्तिः, क्रों, कीलकं, मम ये ये प्रतिकूलकारिणस्त्रैलोक्यवर्तिनस्तेषां स्वक्षेत्र[मम]कळत्रपुत्रमित्र-पशुकृषिगृहदेहधनाभिमानिनां प्राणैकप्रतिकूलकारिणां शत्रूणां तत्तद्वाङ्मनः-कायचेष्टाहतिविशु(सि)द्ध्यर्थे जपे विनियोगः ।

End:

ओं ह्रीं क्रों शीर्षण्वतीं . . , शुभिः। तत्सवि . . . यात्। दाहय दाहय स्वाहा। क्षिप्रारोग्यं कुरु कुरु। पुनस्सम्पुटीकरण-पञ्चकं कुर्यात्। लमिति पञ्चपूजां कुर्यात्। अङ्गन्यासकरन्यासं कुर्यात्। प्रत्याङ्गिरापरदेवीश्रीपादुकां पूजयामि तर्पयामि नमः ॥

No. 6651· प्रत्याङ्गिराभद्रकालीमन्त्रः. PRATYAṄGIRĀBHADRAKĀLĪMANTRAḤ.

Page, 1. Lines, 14 on a page.

Begins on fol. 169*b* of the MS. described under No. 5673

Complete.

This Mantra is intended to propitiate Bhadrakālī as described in the Atharva-vēda.

Beginning :

अस्य श्रीप्रत्यङ्गिराभद्रकालीमहामन्त्रस्य अङ्गिरा ऋषिः, अथर्वण-भद्रकाली प्रत्याङ्गिरा परकृत्या देवता, क्षां बीजं, ह्रीं कीलकं, स्वाहा शक्तिः, मम अथर्वणभद्रकालीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

सिंहां सिंहमुखीं सखीं भगवतः श्रीभैरवस्योल्लस-
च्छूलस्थूलकपालपाशडमरुव्याघ्राग्रहस्ताम्बुजाम् ।
दंष्ट्राकोटिविशङ्कटास्यकुहरामारक्तनेत्रत्रयीं
बालेन्दुद्युतिमौलिकां भगवतीं प्रत्यङ्गिरां भावये ॥

No. 6652. प्रत्यङ्गिरामन्त्रः.

PRATYAṄGIRĀMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 45*a* of the MS. described under No. 124.

Complete.

This Mantra is addressed to the goddess Pratyaṅgirā; and its proper repetition is believed to have the power of bewildering one's enemies, to make them stand still and motionless, and also to destroy them.

Beginning :

ओं ह्रां नमः, कृष्णवाससे शतसहस्रकोटिसिंहवाहने सहस्रभुजे महाबाहे महावलपराक्रमपूजिते अजिते अपराजिते देवि महाप्रत्यङ्गिरे ।

End :

मम शत्रून् भक्षय भक्षय ओं ह्रां ह्रां ह्रीं जम्भय जम्भय मोहय मोहय स्तम्भय स्तम्भय आं ह्रां हुं फट् प्रत्यङ्गिरे स्वाहा ॥

No. 6653. प्रत्यङ्गिरामन्त्रः.

PRATYAṄGIRĀMANTRAḤ.

Pages, 3. Lines, 3 on a page.

Begins on fol. 22*a* of the MS. described under No. 5660.

Incomplete.

Similar to the above.

Beginning :

अस्य श्रीप्रत्यङ्गिरामहामन्त्रस्य कालाग्निरुद्र ऋषिः, गायत्री त्रिष्टुब्बृहती-पङ्क्तिर्जगती छन्दांसि, परापरदेवी देवता; ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, प्रत्याङ्गिरामहाप्रसादासिद्ध्यर्थे जपे विनियोगः ।

End :

नमस्ते शत्रुरुधिरपानोन्मत्तां परां शिवाम् ।
एवं ध्यात्वा महादेवीं जपेन्मन्त्रं यथाविधि ॥

No. **6654.** प्रत्यङ्गिरामन्त्रः.
PRATYAṄGIRĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 6173.
Complete.
Similar to the above.

Beginning :

अस्य श्रीप्रत्याङ्गिरापरदेवतामूलमहामन्त्रस्य प्रत्याङ्गिरा ऋषिः, गायत्री छन्दः, उग्रकृत्या देवता; कमिति बीजं, अमिति शक्तिः, ममिति कीलकं, मम प्रत्यङ्गिरामूलमहामन्त्रजपे विनियोगः ।

End :

सह नाववतु शान्तिः प्रत्यङ्गिरापरदेवताप्रसादसिद्धिरस्तु ।

ज्वालात्मकाय विद्महे महाप्रत्यङ्गिराय धीमहि । तन्नः प्रत्यङ्गिरा प्रचोदयात् ॥

No. **6655.** प्रत्यङ्गिरामन्त्रः.
PRATYAṄGIRĀMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 3862.
Incomplete.
Same as the above.

No. 6656. प्रत्यङ्गिरामन्त्रः.
PRATYAṄGIRĀMANTRAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 7*a* of the MS. described under No. 3862.

Incomplete.

The due repetition of this Mantra, which is also addressed to the goddess Pratyaṅgirā, is considered to be helpful to one in the accomplishment of the four Puraṣārthas or aims of life, viz., Dharma, Artha, Kāma and Mōkṣa.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्ध्यर्थं प्रत्यङ्गिरापरमेश्वरीदेवतामुद्दिश्य देवताप्रीत्यर्थं यथासम्भवमन्त्रजपं करिष्ये । अस्य श्रीप्रत्यङ्गिरापरमेश्वरीमहामन्त्रस्य प्रत्यङ्गिरा ऋषय(षि):, अनुष्टुप् छन्दः, उग्रकृत्या देवता, अं बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम प्रत्यङ्गिरापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

सिंहां सिंहमुखे(खीं) सखीं भगवतः प्रोत्फुल्लनेत्रोज्वलां
शूलस्थूलकपालपाशडमरुव्याघ्राग्रहस्ताम्बुजाम् ।
दंष्ट्राकोटिविशङ्कटास्यकुहरामारक्तनेत्रत्रयीं
बालेन्दुद्युतिमौलिकां भगवतीं प्रत्यङ्गिरां भावये ॥

आं ह्रीं क्रों ओं.

No. 6657. प्रत्यङ्गिरामन्त्रपारायणम्.
PRATYAṄGIRĀMANTRAPĀRĀYAṆAM.

Pages, 27. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 5737.

Incomplete.

The repetition of this Mantra is believed to have the power to counteract the evil effects of black magic and to defeat and destroy one's enemies.

Beginning:

देशकालादि सङ्कीर्त्य शुभतिथौ मम परकृतक्रियमाणकरिष्यमाण-आभिचारिकसर्वोपद्रवनिवृत्त्यर्थं . . . . प्रत्यङ्गिरासूक्तपारायणङ्करिष्ये । तदादौ दशदिग्बन्धनध्यानशापविमोचन शान्तिपठनङ्करिष्ये । दिग्बन्धनप्रकारः—

यमिति सर्वमन्त्राणां प्रत्यङ्गिरा ऋषिः, अनुष्टुप् छन्दः, क्वचिन्नाना छन्दांसि, इन्द्रादयो लोकपाला देवताः, दशदिग्बन्धने विनियोगः ।

End:

ओं क्षोभिणि क्षें क्षें मम शत्रून् क्षोभय क्षोभय, ओं द्राविणि क्षें क्षें मम शत्रून् द्रावय द्रावय, ओं निकृन्तनि क्षें क्षें मम शत्रून्निकृन्तय निकृन्तय, ओं भ्रामिणि क्षें क्षें मम शत्रून् भ्रामय भ्रामय, ... सम्मोहिनि क्षें क्षें शत्रून् सम्मोहय सम्मोहय ।

य इदं धारयेद्विद्यां त्रिसन्ध्यं यः पठेदपि ।
सोऽपि दुःखान्तरादीनि हन्याच्छत्रून्न संशयः ॥
कूटस्थः कुरुते यस्माद्विरिदुं-बीजपञ्चकम् ।
फट्कारेण समानीतं रक्षयेत्साधकोत्तमः ॥

Colophon:

इति प्रत्यङ्गिरामेलनमन्त्रः सम्पूर्णः ॥

No. **6658.** प्रत्यङ्गिरामालामन्त्रः.

PRATYAṄGIRĀMĀLĀMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 21.

Complete.

This Mantra is in praise of the goddess Pratyaṅgirā under various significant names.

Beginning:

अस्य श्रीमालामन्त्रस्य आङ्गीरसप्रत्याङ्गिरा ऋषिः, कृत्या देवता, मालामन्त्रजपे विनियोगः । ह्रामिति न्यासः ।

End:

ह स ख फ्रें महायोगिनीमुद्रां प्रदर्श्य उपसंहारमुद्रां निर्याणमुद्रां प्रदर्श्य । यस्य स्मृत्या च—ततो जपपूजातर्पणहोमक्रियादिषु न्यूनं श्रीप्रत्यङ्गिरापरमेश्वरीयजपन्तु मया देवि परिपूर्णं तदस्तु मे । अनेन यथासं(भव)जपेन च भगवती सर्वात्मिका श्री--माषमदीयां(?) मत्स्वामिनः । (सह)स्र जपेन मनसा वाचा हस्ताभ्यां यत्कृतं तत्सर्वं ब्रह्मार्पणं भवति स्वाहा ॥

No. **6659.** प्रत्यङ्गिरामालामन्त्रः.

PRATYAṄGIRĀMĀLĀMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 30*a* of the MS. described under No. 21

Complete.

Similar to the above.

Believed to be efficacious in counteracting the evil effects of black magic and of hostile Mantras and Tantras.

Beginning:

ओं ह्रीं नमः कृष्णवाससे शतसहस्रकोटिसिंहवाहने सहस्रभुजे महाबाहे. . . . .

ह्रां ह्रीं ह्रूं जम्भय जम्भय ह्रीं हुं फट् प्रत्यङ्गिरे स्वाहा ।

ओन्नमः कृष्णवस्त्रशोभिते सकलसेवकजनोपकारकनिजघट्टनसंघट्टनसंहारके अनेककोटिसिंहवाहने सहस्रवदने द्विसहस्रभुजलताविभूषिते ।

End:

मन्त्रकष्टु मर्दय मर्दय, तन्त्रकष्टु त्रासय त्रासय, नरकष्टु नाशय नाशय, बन्धय बन्धय, भ्रमय भ्रमय, ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ठां ठां ठां ठां ठां ठां भ्रां फट् स्वाहा ॥

No. **6660.** प्रत्यङ्गिरासूक्तमन्त्रः.

PRATYAṄGIRĀSŪKTAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 101*b* of the MS. described under No. 5566.

Complete.

This contains a Mantra forming part of a certain hymn in praise of the goddess Pratyaṅgirā, and its repetition is held to be conducive to the attainment of spiritual wisdom.

Beginning:

अस्य श्रीप्रत्यङ्गिरससूक्तस्य कश्यप ऋषिः, अव ब्रह्म द्विषो जहीत्येकपदा गायत्री छन्दः, प्रतिकृत्याकालाग्निरुद्रश्रीमहादेवो देवता; कं बीजं, अमति शक्तिः, तदिति कीलकं, मम दिव्यज्ञानसिद्ध्यर्थे विनियोगः ।

End:

अव ब्रह्म द्विषो जहि ॥

No. **6661.** प्रत्यङ्गिरासूक्तम्.

PRATYAṄGIRĀSŪKTAM.

Pages, 2. Lines, 27 on a page.

Begins on fol. 254*b* of the MS. described under No. 581 wherein this Mantra is found to form one of the collection of Mantras denoted by the general name of Mantramālikā.

Complete.

Same as the above.

No. **6662.** प्रत्यङ्गिरासूक्तम्.

PRATYAṄGIRĀSŪKTAM.

Page, 1. Lines, 17 on a page.

Begins on fol. 302*a* of the MS. described under No. 5477.

Complete.

Same as the above.

No. **6663.** प्रत्यङ्गिरासूक्तम्.

PRATYAṄGIRĀSŪKTAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 181*a* of the MS. described under No. 5417.

Complete.

This Mantra is a hymn in praise of the goddess Pratyaṅgirā. It consists of thirty Ṛks. Its proper repetition is believed to enable one to destroy one's enemies and to counteract the evil effects of hostile Mantras.

Beginning:

तच्छंयोरित्यस्य मन्त्रस्य बार्हस्पत्यश्शंयुर्नाम ऋषिः, विश्वे देवा देवता, शक्करी छन्दः, शान्त्यर्थे विनियोगः ।

*　*　*　*

ओं भद्रन्नो अपिपातयाम नः । ओं शान्तिः शान्तिः शान्तिः । अस्य श्रीप्रत्यङ्गिरासूक्तस्य प्रत्यङ्गिरा ऋषय(षि):, अनुष्टुबादिनानाछन्दांसि, उग्रकृत्या देवता, श्रीसदाशिवप्रीत्यर्थे विनियोगः ।

*　*　*　*

ओं याङ्कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणापनिर्णुदः(द्मः) प्रत्यक् कर्तारमृच्छतु ॥

End:

कृष्णवर्णे महद्रूपे खट् फट् जहि महाकृत्ये ।
कुबेरन्ते मुखं रौद्रं नन्दिमानन्दिमावह ॥
ज्वरं मृत्युभयं घोरं विषं नाशय मे ज्वर ।
ओं शान्तिश्शान्तिश्शान्तिः ॥

No. **6664.** प्रत्यङ्गिरासूक्तम्.

PRATYAṄGIRĀSŪKTAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 2*b* of the MS. described under No. 5852.

Complete.

Similar to the above.

Beginning:

यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणा विनिर्णुद्मः प्रत्यक्कर्तारमृच्छतु ॥

End:

त्रियम्बकं—तात्, कृणुष्व—द्यात् ।
ओं शान्तिश्शान्तिश्शान्तिः ।
सिंहां—भावये, लमिति पञ्चपूजां कुर्यात् ।
गच्छ गच्छ पुनर्गच्छ स्वस्थानं परमेश्वरि ।
यत्र यत्र सुखे तिष्ठ तत्र तत्र सुखं कुरु ॥

No. **6665.** प्रत्यङ्गिरासूक्तम्.
PRATYAṄGIRĀSŪKTAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 74*a* of the MS. described under No. 235.
Complete.

This contains also thirty Vēdic Ṛks in praise of the goddess Pratyaṅgirā as a manifestation of Śakti.

Similar to the above.

Beginning:

अस्य श्रीप्रत्यङ्गिरासूक्तमन्त्रस्य त्रिंशदृचाम् अनुष्टुप् छन्दः, अवब्रह्मेत्येकपदा गायत्री, यो न इति त्रिष्टुप्, प्रत्यृचं कृत्या देवता, कालाग्निरुद्रः श्रीमहादेवः कृत्या वा, कमिति बीजं, अमिति शक्तिः, मम ये प्रतिकूलकारिणस्त्रैलोक्यवर्तिनः तेषां स्वक्षेत्रपशुकृषिदेह . . . कायचेष्टाव्याहतिविशु(सि)द्ध्यर्थे जपे विनियोगः ।

End:

क्षिप्रं कृत्ये निवर्तस्व शत्रोरेव गृहं प्रति ।
षष्ठमं संप्रवक्ष्यामि मन्त्रराजं यथाक्रमम् ॥

* * * *

मूलमन्त्रस्य वर्णानां चतुष्कं प्रतिपत्रके ।
तद्यन्त्रं धारयेद्धीमान् सर्वकर्मसुसाधनम् ॥
ओं शान्तिश्शान्तिश्शान्तिः ॥

No. 6666. प्रत्यङ्गिरासूक्तव्याख्या.

PRATYAṄGIRĀSŪKTAVYĀKHYĀ.

Pages, 15. Lines, 24 on a page.

Begins on fol. 124 of the MS. described under No. 2961.

Complete.

A commentary on the Pratyaṅgirāsūkta, which is a hymn in praise of the goddess Pratyaṅgirā.

Beginning:

ओं यां कल्पयन्ति नोऽरयः यां देवतां प्रसारप्रेरितां परिकल्पयन्ति अस्मदीयव्यापारसमर्थां कुर्वन्तीति होमजपव्यापारैरुत्पादयन्ति । इत्थं नः अरयः शत्रवः, नः अस्माकम्, क्रूरां निर्दयाम् ।

End:

अव ब्रह्म द्विषो जहि, अवेति पदं अवतेः मध्यमपुरुषैकवचनम्, ब्रह्मेति नपुंसकसंबुद्धिः, अस्मान्त्सर्वदा अव रक्ष, द्विषः अस्मद्द्वेष्टॄन् सर्वदा जहि, इत्यस्य मन्त्रस्याशयः । ब्रह्मा आदिकाले.

Colophon:

प्रत्यङ्गिराव्याख्यानं सम्पूर्णम् ॥

No. 6667. प्रत्यङ्गिरासूक्तव्याख्या.

PRATYAṄGIRĀSŪKTAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 14. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 136*a*. The other works herein are Prapañcasāravivaraṇa 1*a*, Mantrasāra 107*a*, Yantrasāra 143*a*.

Incomplete.

Same as the above.

No. 6668. प्रदोषपञ्चाक्षरीमन्त्रः.

PRADŌṢAPAÑCĀKṢARĪMANTRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 81*a* of the MS. described under No. 5660.

Complete.

The Mantra proper is omitted in this manuscript.

This Mantra consists of the well-known five-syllabled religious prayer-formula of the Śaivas, especially to be used during the प्रदोष time.

Beginning:

अस्य श्रीप्रदोषपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीसाम्बसदाशिवो देवता; ओं बीजं, नमः शक्तिः, शिवायेति कीलकं, मम श्रीसाम्बसदाशिवप्रसादासिद्ध्यर्थे जपे विनियोगः ।

End:

चैतन्यं परिपूर्णमेकममलं ज्योतिर्मयं व्यापकं
तत्पञ्चाक्षरमन्त्रमाद्यममलं सूक्ष्मातिसूक्ष्माप(त्प)रम् ।
लिङ्गं ब्रह्म सनातनं सुमनसां ध्यातव्यरूपं सदा
बाह्याभ्यन्तरसंस्थितं परशिवं प्राणेश्वरं भावये ॥ मनुः ॥

No. 6669. प्रपञ्चन्यासः.

PRAPAÑCANYĀSAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under **No. 673.**

Complete.

On the ceremonial touching of certain parts of the body, repeating at the same time the appropriate letters denoting the goddess Śakti who is conceived to manifest herself in the universe in various ways.

Beginning:

प्रपञ्चन्यास उच्यते—तत्र मूलविद्यायां वक्ष्यामि—ऋष्यादिकर-षडङ्गन्यासेन प्राणायामान् विधाय न्यसेत् । ओं ऐं ह्रीं श्रीं हसौं सहौं अं प्रपञ्चरूपायै नमः, श्रियै नमः शिरसि ।

End:

ओं ऐं ह्रीं श्रीं हसौं सहौं मूलं अं सकलप्रपञ्चरूपायै आर्याम्बायै नम इति सर्वाङ्गानि व्यापयेत् ॥

Colophon:

इति प्रपञ्चन्यासः ॥

No. 6670. प्रलयकालभैरवमालामन्त्रः.

PRALAYAKĀLABHAIRAVAMĀLĀMANTRAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 27*a* of the MS. described under No. 5836.

Complete.

This Mantra is addressed to Śiva conceived as Bhairava engaged in bringing about universal dissolution.

Beginning:

ओंनमो भगवते प्रलयकालभैरवाय ताण्डवाडम्बराय शशाङ्ककृत-शेखराय नागयज्ञोपवीताय अनेककालनिर्नाशनाय ।

End:

पातालं बन्ध बन्ध आं ह्रूं बडबानलभैरवाय हुं फट् स्वाहा ॥

No. 6671. प्रलयकालवीरभद्रबडबानलमन्त्रः.

PRALAYAKĀLAVĪRABHADRABAḌABĀNALA-MANTRAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 77*a* of the MS. described under No. 5673.

Complete.

This Mantra is supposed to propitiate Śiva conceived as Vīrabhadra at the time of the universal dissolution and is believed to have the power to enable one to overcome all dangers and difficulties.

Beginning:

अस्य श्रीवीरभद्रबडबानलस्तोत्रमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीप्रलयकालवीरभद्रो देवता; ओं बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, मम सर्वोपद्रवप्रहर(हा)णार्थसिद्ध्यर्थं श्रीप्रलयकालवीरभैरवप्रीत्यर्थे जपे विनियोगः ।

End:

ओंनमो भगवते प्रलयकालवीरभद्रावताराय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा ॥

No. 6672. प्रलयकालवीरभद्रबडबानलमन्त्रः.

PRALAYAKĀLAVĪRABHADRABAḌABĀNALA-MANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 111*a* of the MS. described under No. 119.

Complete.

Similar to the above.

Beginning:

अस्य श्रीवीरभद्रबडबानलमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, प्रलयकालवीरभद्रो देवता; ह्रां बीजं, ह्रीं शक्तिः, ह्रौं कीलकं, श्रीप्रलयकालवीरभद्रप्रीत्यर्थे विनियोगः ।

For the end, see under the previous number.

No. 6673. प्रलयकालवीरभद्रबडबानलमन्त्रः.

PRALAYAKĀLAVĪRABHADRABAḌABĀNALA-MANTRAḤ.

Substance, palm-leaf. Size, $5\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 7. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 5*a*. The other works herein are Indrākṣīstōtra-mantra 1*a*, Śarabhasāluvamantra 4*a*.

Complete.

Similar to the above. Considered to be efficacious in safe-guarding one's Mantras and Tantras and in nullifying the effects of hostile Mantras and Tantras.

For the beginning, see under the previous number.

End:

दक्षयज्ञविनाशनाय आत्ममन्त्रयन्त्रतन्त्ररक्षणाय परमन्त्रपरयन्त्र-परतन्त्रप्रच्छेदनाय आगच्छ कह कह अनेकमुद्राय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा ॥

No. 6674. प्रलयकालहनूमन्मन्त्रः.
PRALAYAKĀLAHANŪMANMANTRAḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 288*b* of the MS. described under No. 5477 wherein this Mantra is found to be in the group of Mantras denoted by the general name of Mantramālikā.

Complete.

This Mantra is addressed to Hanūmat conceived as living at the time of universal dissolution.

Beginning and **End**:

ऋषिदेवताछन्दोबीजशक्तिकीलककरषडङ्गन्यासध्यानादिकं सर्वं पूर्ववत् ।

मन्त्रः—ओं हं रं रं हं रामदूताय हुं फट् स्वाहा ॥

No. 6675. प्रलयकालानलभैरवमालामन्त्रः.
PRALAYAKĀLĀNALABHAIRAVAMĀLĀMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 5836.

Complete.

This Mantra is addressed to Bhairava conceived as terrible as the god of fire engaged in bringing about universal dissolution; and its repetition is supposed to enable one to drive off evil spirits and to secure protection.

Beginning:

ओं प्रळयकालानलभैरवाय भूतप्रेतपिशाचोच्चाटनाय स्वमन्त्रयन्त्रतन्त्रसंरक्षणाय ।

End:

परदाट् छिन्धि छिन्धि नटनाथभैरवाय ओं ह्रीं फट् स्वाहा ॥

No. 6676. प्रसूतिमन्त्रः.
PRASŪTIMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 5987.

Incomplete.

The repetition of this Mantra is held to be efficacious in enabling a pregnant woman to deliver safely and with ease.

Beginning and End:

ओं सिद्धचामुण्डेश्वरि सिद्धयोगिनि खट् खट् स्वाहा । ओन्नमो भगवति सिद्धचामुण्डेश्वरि चामुण्डि योगिनि गिट गिट स्वाहा ॥

No. 6677. प्राणप्रतिष्ठामन्त्रः.
PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 80*b* of the MS. described under No. 5673.

Complete.

The repetition of this Mantra is in ended to consecrate and pour life into images and metallic plates with mystic diagrams, etc.

Beginning:

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणि छन्दांसि, प्राणशक्तिर्देवता, आं बीजं, ह्रीं शक्तिः, क्रों कीलकं, प्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः ।

End:

ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृडया नः स्वस्ति । एवं त्रिवारं जपेत् ॥

No. 6678. प्राणप्रतिष्ठामन्त्रः.
PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 102 of the MS. described under No. 2549.

Complete.

Same as the above.

No. 6679. प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 20 on a page.

Begins on fol. 68*a* of the MS. described under No. 446.

Complete.

Same as the above.

For the beginning, see under the previous number.

End:

वाङ्मनश्चक्षुःश्रोत्राजिह्वाघ्राणा मय्येवागत्य सुखं चिरान्तिष्ठन्तु स्वाहा। ह्रीं ओं इति हृदये हस्तं निधाय त्रिवारं जपेत् ॥

No. 6680. प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 3 on a page.

Begins on fol. 76*a* of the MS. described under No. 29.

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

असुनीते पुनरस्मासु=स्वस्ति मम प्राणा [नि]इहैवागच्छन्ति तिष्ठन्ति तिष्ठन्ति । शुद्धप्रणवं द्वात्रिंशद्वारं जप्त्वा ॥

Colophon:

इति प्राणप्रतिष्ठा सम्पूर्णा ॥

No. 6681. प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 187*a* of the MS. described under No. 119.

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

सुखश्चिरन्तिष्ठन्तु स्वाहा ।

वाय्वग्निशक्रव(रु)णेश्वरराक्षसेन्दुप्रेतेशपत्रलिखितेष्वथ यादि हान्तम् ।

बिन्द्वन्तिकं क्षगतहंसयुतं स्वराणां प्राणेशयन्त्रमथ वर्णवृतं पुरस्थम् ॥

No. 6682. प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 160*a* of the MS. described under No. 537.

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

सर्वेन्द्रियाणि मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागच्छ(त्य) स्थिरं तिष्ठतु(न्तु) स्वाहा ॥

इमं मन्त्रं हस्तेन हृदयमालभ्य त्रिवारं जपेत् ॥

No. 6683. प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 12*a* of the MS. described under No. 6157.

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

सुखश्चिरन्तिष्ठन्तु स्वाहा । पञ्चपूजा । लं पृथ्वीतत्त्वात्मने नारायणाय गन्धं समर्पयामि । . . . .

ओं अमृततत्त्वात्मने अनिरुद्धाय नैवेद्यं समर्पयामि ॥

No. 6684. प्राणप्रातिष्ठामन्त्रः.
PRĀṆAPRATIṢṬHĀMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 224*a* of the MS. described under No. 537.

Complete.

Similar to the above.

For the beginning, see under the previous number.

समस्तयन्त्रचैतन्यार्थे जपे विनियोगः ।

End:

अमुष्य प्राण अमुष्य जीव इह स्थितः । इति द्वादशवारं पठेत् । अनन्तरम् अस्य यन्त्रस्य । पृथिव्यप्तेजोवायव्या(ग्वा)काशात्मने(क)शब्द-स्पर्शगन्धघ्राणादिकमन्नमयप्राणमयमनोमयविज्ञानमयसर्वेन्द्रियाणि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । इति त्रिवारं जपेत् ॥

No. 6685. प्राणप्रतिष्ठामन्त्रः.
PRĀṆAPRATIṢṬHĀMANTRAḤ.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 2. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 114*a*. The other works herein are Saptaśatī 1*a*, Āñjanēyayantra 109*a*, Hanūmatkalpa 115*a*, Saundaryalaharī 129*a*, Caṇḍīyantra 144*a*, Yantrakacchapuṭa, 145*a*, commentary in Telugu on Yantrakacchapuṭa 167*a*, Śrīsūkta 176*a*.

Complete.

Similar to the above.

Beginning:

अन्तर्मुखं सुसत्त्वाख्यं वनजाग्रं बहिर्मुखम् ।
सर्वतोमुखवद्यन्त्रं स्वरूपं परिकीर्तितम् ।
विद्वेषकरणोच्चाटनस्वप्नवश्याकर्षन्तु जाग्रति ।
स्तम्भने मारणे चैव सर्वयन्त्रे समुद्धरेत् ॥

अस्य श्रीप्राणप्रतिष्ठापनमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणि छन्दांसि, सकलजगत्सृष्टिप्राणप्रतिष्ठार्थे विनियोगः ।

End:

अमुष्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणा इहैवागत्यागत्य सुखश्चिरं तिष्ठन्तु स्वाहा । ओं ह्रीं क्रों मम सोमेति वेदमन्त्रम् ॥

No. 6686. प्राणप्रतिष्ठाविधिः.

PRĀṆAPRATIṢṬHĀVIDHIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 140.

Complete.

On details connected with the religious ceremonial of consecrating and pouring life into images by the repetition of certain Mantras.

Beginning:

अथ प्राणप्रतिष्ठाविधिः—प्राणप्रतिष्ठां यथोक्तगुणसम्पन्नेनाचार्येण कारयेत् । अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य . . . .

अमुष्य देवस्य प्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः । मन्त्रवीर्यसम्पादनार्थं मातृकावर्णसहितमङ्गुलिन्यासं करिष्य इति सङ्कल्प्य ओं आकाशवायुवह्निसलिलपृथिव्यात्मने अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यान्नमः ।

End:

इति तृतीयखण्डेन हृदयादिमस्तकपर्यन्तं पूर्वोक्तखण्डतृतीयेन आं ह्रीं क्रों यं रं लं वं शं षं सं हं इत्येकादशाक्षराणि प्रतिवर्णमादौ जप्त्वा ध्रुवा द्यौरिति मन्त्रेण पुष्पाक्षतान् विक्षिप्य नमस्कुर्यात् ॥

Colophon:

इति प्राणप्रतिष्ठाविधिः समाप्तः ॥

No. 6687. प्राणेश्वरीमन्त्रः.
PRĀṆĒŚVARĪMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 5524.

Complete.

This Mantra is addressed to Śakti who is herein described as Prāṇēśvarī; and its proper repetition is supposed to have the power to enable one to destroy one's enemies, to drive off evil spirits, and to protect one's self from all dangers.

Beginning:

अस्य श्रीप्राणेश्वरीमहामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणि छन्दांसि, सर्वापमृत्युकालमृत्युनाशिनी प्राणेश्वरी देवता ; ह्रीं बीजं, नमः शक्तिः, मम सर्वप्रतिकूलनिवारणस्थानेषु . . . . . तेषां शत्रुसंहरणार्थं भूतप्रेतपिशाचोच्चाटनार्थं प्राणेश्वरीप्रकाशमन्त्रजपे विनियोगः ।

End:

मम शत्रून् शीघ्रं भक्षय भक्षय; मां सर्वोपद्रवेभ्यो रक्ष रक्ष ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः हुं फट् स्वाहा ॥

No. 6688. प्रासादपञ्चाक्षरीमन्त्रः.
PRĀSĀDAPAÑCĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol 83*a* of the MS. described under No. 132.

Complete.

This is the well-known prayer formula of the Śaivas consisting of five syllables; and its repetition is intended to please Śiva associated with Pārvatī.

Beginning:

अस्य श्रीमत्प्रासादपञ्चाक्षरीमहामन्त्रस्य नारद ऋषिः, पङ्क्तिश्छन्दः, साम्बसदाशिवो देवता ; ओं बीजं, ह्रीं शक्तिः, ह्रौं कीलकं, साम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ।

End:

वामाङ्कन्यस्तवामेतरकरकमलायास्तथा वामहस्त-
न्यस्तारक्तोत्पलायास्स्तनपरिविलसद्वामबाहुः प्रियायाः ।
सर्वाकल्पाभिरामो धृतपरशुमृगाभीष्टदः काञ्चनाभो
ध्येयः पद्मासनस्थः स्मरललितवपुस्सम्पदे पार्वतीशः ॥

No. 6689. प्रासादपञ्चाक्षरीमन्त्रः. PRĀSĀDAPAÑCĀKṢARĪMANTRAḤ

Pages, 2. Lines, 15 on a page.

Begins on fol. 36*a* of the MS. described under No. 5673 wherein the name Āmnāyamantramālikā is given to a collection of Mantras the first of which begins on fol. 1*a*.

Complete.

Similar to the above.

Beginning:

अस्य श्रीप्रासादपञ्चाक्षरीमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्री-साम्बशिवो देवता ; ओं बीजं, नमः शक्तिः, आयेति कीलकं, मम श्री-साम्बप्रसादसिद्ध्यर्थे विनियोगः ।

End:

मनुः—ओं ह्रीं ह्रौं नमश्शिवाय । श्रीशैवसमयविद्याश्री ।

No. 6690. प्रासादपञ्चाक्षरीमन्त्रः. PRĀSĀDAPAÑCĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 15 on a page.

Begins on fol. 49*b* of the MS. described under No. 5673.

Complete.

Similar to the above.

Beginning:

अस्य श्रीप्रासादपञ्चाक्षरीमहामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्री उमामहेश्वरो देवता ; ओं बीजं, ह्रीं शक्तिः, ह्रौं कीलकं, मम उमामहेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं यं त्रिजगत्पतिपाताळदिशि मां रक्ष रक्ष भूर्भुवस्सुवरोमिति दिग्बन्धः ।

मूले कल्पद्रुमस्य. . . . . . .
गुहगजवदनाभ्यां समाश्लिष्टपार्श्वम् ।
वामङ्कश्लिष्टवामेति ध्यात्वा ॥

No. **6691.** प्रासादपञ्चाक्षरीमन्त्रः.

PRĀSĀDAPAÑCĀKṢARĪMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 54*a* of the MS. described under No. 5422.

Complete.

Same as the above.

No. **6692.** प्रासादपञ्चाक्षरीमन्त्रः.

PRĀSĀDAPAÑCĀKṢARĪMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 33*a* of the MS. described under No. 5422.

Complete.

Same as the above.

No. **6693.** प्रासादपञ्चाक्षरीमन्त्रः.

PRASĀDAPAÑCĀKṢARĪMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 149*a* of the MS. described under No. 781.

Complete.

Same as the above.

No. 6694. प्रासादपरापराप्रसादमन्त्रः.

PRĀSĀDAPARĀPARĀPRASĀDAMANTRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 115*a* of the MS. described under No. 587.

Complete.

This Mantra is intended to propitiate Parādēvatā and thus to enable one to obtain salvation through the favour of that goddess.

Beginning:

अस्य श्रीमन्महामोक्षसायुज्यकैवल्यप्रासादपराप्रासादतारप्रासादपरतत्त्वप्रासादकेवलपराप्रासादषोडशीयुक्तलक्ष्मीमहामन्त्रस्य अस्थिचर्मनाडिरोममांसात्मकस्थूलशरीराधिष्ठानाविश्वात्मकाकारब्रह्माण्डमयऋग्वेदकोशव्यापी ऋषिः, ...

क्षुत्तृष्णानिद्रालस्यमैथुनाधिष्ठानकारणसामवेदशरीरात्मतत्त्ववादिप्राज्ञरूपमकारात्मकमनोमयकोशव्यापी नीलपीतरक्तश्वेतामिश्रात्मकसर्वतेजात्मको[प्रासादसिद्ध्यर्थं जपो विनियोगात्मक] देवता । . . . . .

सुधासहस्रारकुण्डल्यन्तर्गतसर्वानन्दमयसमरसमहामोक्षप्रसादासिद्ध्यर्थं नीलगर्भान्तस्थितपीतकलाबिन्दुत्रिरूपातीतद्वादशान्तनिर्वाणकलापञ्चबिन्दुयोगे विनियोगः ।

End:

पूर्णाभिषेका सह सर्वतन्त्रे आम्नायदीक्षा न ह भूतले सदा ।
प्रकाशरक्तामदनुत्तराख्या पराप्रसादा मनुयोगमुक्तिदा ॥
ओं तत्सर्वं श्रीसच्चिदानन्दगुरुब्रह्मार्पणमस्तु ॥

No. 6695. प्रासादपरापराप्रासादमन्त्रः.

PRĀSĀDAPARĀPARĀPRĀSĀDAMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 233*a* of the MS. described under No. 124.

Complete.

Similar to the above.

Beginning:

अस्य श्रीप्रासादपरापराप्रासादमहामन्त्रस्य चिद्रूपानन्दभैरव ऋषिः, जगती छन्दः, श्रीप्रासादपरापराप्रासादरूपिण्यर्धनारीश्वर्यम्बा देवता; हं बीजं, सः शक्तिः, सो हं कीलकं, प्रासादपरापराप्रासादसिद्ध्यर्थे—गः।

End:

ओं ऐं ह्रीं श्रीं हं सशिवस्सो हं हं सः ह्सौः
स्हौः सो हं हं सः श्रीं ह्रीं ऐं ओं श्रीपा—मः।
मूर्ध्नि सञ्चिन्तयेद्देवं श्रीगुरुं भक्तवत्सलम् ॥
ह्सौः स्हौः किं प्रासादपरापराप्रासादाम्बादिव्यश्री—मः ॥

No. **6696.** प्रासादपरापराप्रासादमन्त्रः.

PRĀSĀDAPARĀPARĀPRĀSĀDAMANTRAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 24*b* of the MS. described under No. 5673.

Complete.

Same as the above.

No. **6697.** प्रासादपरामन्त्रः.

PRĀSĀDAPARĀMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 62*a* of the MS. described under No. 2886.

Complete.

This Mantra is addressed to the goddess Parā who is the same as Pārvatī, and its repetition is held to have the power of securing for one the favour of that goddess.

Beginning:

अस्य श्रीप्रासादपरामहामन्त्रस्य घोरानन्दभैरव ऋषिः, अतिजगती, श्रीप्रासादपरा देवता; हं बीजं, सः शक्तिः, औः कीलकं, प्रासादपराप्रसाद—गः ॥

End:

ध्यानम्। पञ्चपूजा ॥ ह्सौः ॥

No. 6698. बगलानुष्ठानविधिः.

BAGALĀNUṢṬHĀNAVIDHIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 79*a* of the MS. described under No. 235.

Complete.

This Mantra is addressed to Bagalāparamēśvarī who is a manifestation of Śakti ; and is believed to have the power to enable one to drive away and destroy one's enemies or to annoy them in several ways.

Beginning :

एवं गुण—तिथौ मम सर्वाभीष्टसिद्ध्यर्थं श्रीब्रह्मास्त्रबगलापरमेश्वर्यम्बा देवतामुद्दिश्य श्रीबगलापरमेश्वरीदेवताप्रीत्यर्थं बगलापरमेश्वर्यम्बामन्त्रानुष्ठानमहङ्करिष्ये ।

अस्य श्रीब्रह्मास्त्रबगलापरमेश्वरीमहामन्त्रस्य नारदभगवानृषिः, अनुष्टुप् छन्दः, श्रीबगलापरमेश्वरी देवता ; ओं बीजं, ह्रीं शक्तिः, बगलामुखीति कीलकं, मम बगलापरमेश्वरीप्रसादासिद्ध्यर्थे जपे विनियोगः ।

End :

End:

हामित्यादिन्यासः । मन्त्रराजश्रीपादुकां पूजयामि ॥

No. **6869.** मन्त्रसन्ध्यावन्दनप्रयोगः.

MANTRASANDHYĀVANDANAPRAYOGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 24*b* of the MS. described under No. 673.

Complete.

On details connected with the performance of the morning and evening prayers by using the Dēvīmantra.

Beginning:

ऐं क ए ई ल ह्रीं आत्मतत्त्वाय स्वाहा, क्लीं ह स क ह ल ह्रीं विद्यातत्त्वाय स्वाहा, सौः स क ल ह्रीं शिवतत्त्वाय स्वाहा, ऐं क ए ई ल ह्रीं क्लीं ह स क ह ल ह्रीं सौः स क ल ह्रीं सर्वतत्त्वाय स्वाहा । वामहस्ते जलं गृहीत्वा मूलमन्त्रेण पञ्चवारमभिमन्त्र्य मूर्ध्नि हृदि पादेषु मार्जयित्वा ।

End:

अथार्धरात्रिसमये ब्रह्मरन्ध्रे जपारुणे ।
मूले देवीं त्रिधा स्मृत्वा सन्ध्यानुष्ठानमाश्रितः ॥

Colophon:

इति सन्ध्यासंक्षेपः ॥

No. **6870.** मन्त्रावलिः.

MANTRĀVALIḤ.

Pages, 68. Lines, 9 on a page.

Begins on fol. 50*a* of the MS. described under No. 675.

Complete.

The series of Mantras to be repeated in connection with the religious worship beginning with the worship of the Śākta-gurus and ending with the worship of Śakti.

Beginning :

मन्त्रावलीप्रकारो लिख्यते— ओं ऐं ह्रीं श्रीं हं सश्शिवस्सो हं स्वगुरुलोकानन्दनाथश्रीपादुकां पूजयामि नमः, सो हं हं सश्शिवः परमगुरुपूर्णविद्यैश्वर्यानन्दनाथसंविदम्बाश्रीपादुकां पूजयामि नमः, हं सश्शिवस्सो हं हं सः परमेष्ठिगुरुश्रीलोकानन्दनाथश्रीपादुकां पूजयामि नमः ।

End :

ओं कुरुकुल्ले ह्रीं मम सर्वजनं वशमानय स्वाहा । इति पञ्चविंशार्णविद्या, ओं कुरुकुल्ले स्वाहा इति सप्तदशार्णविद्या, ओं कुरुकुल्ले ह्रीं स्वाहा इति त्रयोदशार्णविद्या ॥

Colophon :

इति मन्त्रावलिगुरुत्रयादिकुरुकुल्लान्तं समाप्तम् ॥

No. 6871. मन्मथमन्त्रः.
MANMATHAMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 308*a* of the MS. described under No. 5477, wherein this Mantra is found in the group of Mantras denoted by the general name of Mantramālikā (Ākāśabhairavakalpa).

Complete.

The due repetition of this Mantra, which is addressed to Manmatha, the god of love, with the required ceremonials is held to have the power to enable the supplicant to win the love and affection of whomsoever he or she desires at heart.

Beginning :

अस्य श्रीमन्मथमन्त्रस्य संमोहन ऋषिः, गायत्री छन्दः, रतिनायको देवता, इं बीजं, ईं शक्तिः, वश्याकर्षणार्थे विनियोगः ।

End:

ओं क्लीं ईं रतिदेवीसमेताय कामराजाय सर्वाकर्षणाय स्वाहा—
इति लक्षं जपः । दशांशहोमः ॥

No. **6872.** मन्मथमन्त्रः.

MANMATHAMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 2424.

Complete

The repetition of this Mantra which is also addressed to Manmatha is considered to have the power to enable one to bring people under one's magic control and influence.

Beginning:

मन्मथमन्त्रः—

ओं अस्य श्रीमन्मथमन्त्रस्य मच्च(त्स्ये)न्द्र ऋषिः, अनुष्टुप् छन्दः, मन्मथो देवता; ओं क्लीं बीजं, क्लीं शक्तिः, क्लीं स्वाहा, मम विश्वाकर्षणार्थे विनियोगः ।

End:

ओं क्लीं कामदेवाय सर्वजनप्रियाय सर्वजनसंमोहनाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वजनहृदयं मम वशङ्कुरु कुरु स्वाहा ॥

यन्त्रश्लोकः—

मान्तन्नामयुतं द्विरेफसहितं बाह्ये कलावेष्टितं
तद्बाह्येऽग्निमरुत्पुरश्च सहितं तत् ताम्रपत्रोदरे ।
लेखित्वा परवृक्षकण्टकयुतं श्वेतार्कदुग्धान्वयं
तप्तं दीपशिखाग्निना त्रिदिवसात् रम्भासमाकर्षणम् ॥

No. **6873.** मलयाळभगवतीमन्त्रः.

MALAYĀḶABHAGAVATĪMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 31*a* of the MS. described under No. 5832, wherein this Mantra has been omitted to be included among the other works contained therein.

Complete.

This Mantra is addressed to the goddess Bhagavatī popularly known as Malayāḷa-bhagavatī, probably because Malabar is considered by magicians to be her favourite abode; and the repetition of the Mautra is believed to have the power to enable one to destroy and drive away evil spirits.

Beginning:

ओं नमो मलयालभगवति शाम्भवि रणाकारशक्ति ट ट ट ट ट ट ट ह्रीं ह्रीं ७ ह्रीं त्राहि ७ ह्रीं कृन्त ७ किणि ७ झं ७ भं ७ आवेश ७ उत्तरग्रहावेशदक्षिणग्रहावेशपूर्वग्रहावेश.

End:

ओन्नमो मलयाळभगवति गौरि गान्धारि मालिनि स्वकर्मचाण्डालि सर्वग्रहोच्चाटनि स्वाहा ॥

No. 6874. मल्लमर्दनगोपालमन्त्रः.

MALLAMARDANAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 48*b* of the MS. described under No. 5885.

Complete.

This Mantra is in praise of Kṛṣṇa conceived as the cowherd who killed in single combat certain wrestlers employed by Kaṁsa to kill Kṛṣṇa.

Beginning:

अस्य श्रीमल्लमर्दनगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः श्रीमल्लमर्दनगोपालो देवता, ह्रीं बीजं, हुं शक्तिः, फट् कीलकं, मल्ल-मर्दनगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

मनुः—

ह्रीं कृष्णाय हुं फट् स्वाहा ॥

No. 6875. महाकालीदुर्गामन्त्रः.

MAHĀKĀLĪDURGĀMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 48*b* of the MS. described under No. 5445, wherein this Mantra has been omitted to be given among the other works contained therein.

Complete.

This Mantra is addressed to the goddess Durgā conceived as Mahākālī, and its repetition is believed to be capable of sowing the seeds of dissension and discord between two persons even though strongly attached to each other.

Beginning:

ओं पञ्चचाण्डालिनि मातङ्गे कण्ठे कपालधारिणि त्रिशूलधारिणि हन हन प्रण प्रण प्रण.

* * * *

क्लीं ओं तापिता आलन्तापि स्वाहा कालि कालि.

End:

शाबराख्यो महाकालिमन्त्रोऽयं सर्वसिद्धिदः ।
भानुवारे निशाकाले सहस्रं जपमाचरेत् ॥
साक्षात्कारं सहस्रेण सत्यं सत्यं न संशयः ।

विद्वेषणम्—

घर्मटि घर्मटि घर्मटि मर्कटि घोरे घोरतरे उभयोः विद्वेषय विद्वेषय विद्वेषकारिणि काकोलूकयोरिव सह कलहकारिणि हुं हुम् . . .

इत्यष्टोत्तरमन्त्राणां चेति रामलक्ष्मणयोरपि कलहं भवेत् ।

ओं ह्रीं ज्वलं ज्वलाभिन्नभैरवि अमुकामुकयोः काकोलूकयोरिव परस्परविद्वेषणं कुरु कुरु स्वाहा ॥

No. 6876. महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 168*a* of the MS. described under No. 537.

Complete.

This Mantra is addressed to the god Gaṇapati or Vināyaka; and its repetition is intended to enable one to accomplish one's desires and to bring all persons under one's control.

Beginning:

अस्य श्रीमहागणपतिमन्त्रस्य गणक ऋषिः शिरसि, निचृद्गायत्री छन्दः मुखे, श्रीमहागणपतिर्देवता, गं बीजं, स्वाहा शक्तिः, क्लीं कीलकं; मम सर्वाभीष्टसिध्यर्थे जपे विनियोगः ।

End:

ओं ऐं ह्रीं श्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ॥

No. **6877.** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 163 of the MS. described under No. 537.

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

मूलमन्त्रः—

आं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय वशमानय स्वाहा ॥

No. **6878.** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 2*b* of the MS. described under No. 6548.

Incomplete.

Same as the above

No. 6879. महागणपतिमन्त्रः.
MAHĀGAṆAPATIMANTRAḤ.

Page, 1. Lines, 17 on a page.

Begins on fol. 2*a* of the MS. described under No. 5673, wherein this Mantra is found in the group of Mantras denoted by the general name of Āmnāyamantramālikā.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमहागणपतिमन्त्रस्य गणक ऋषिः, निचृद्गायत्री छन्दः, श्रीमहागणपतिर्देवता, गं बीजं, स्वाहा शक्तिः, ग्लौं कीलकं, मम श्रीगणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ॥

No. 6880. महागणपतिमन्त्रः.
MAHĀGAṆAPATIMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 289*a* of the MS. described under No. 5477, wherein this Mantra is found in the group of Mantras denoted by the general name of Mantramālikā.

Complete.

Same as the above.

No. 6881. महागणपतिमन्त्रः.
MAHĀGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 245*a* of the MS. described under No. 581, wherein this Mantra is found in the group of Mantras denoted by the general name of Mantramālikā.

Complete.

Same as the above.

No. **6882.** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 9*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. **6883** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ

Page, 1. Lines, 6 on a page.

Begins on fol. 75*a* of the MS. described under No. 5417.

Complete.

Same as the above.

No. **6884.** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 40*a* of the MS. described under No. 6414.

Incomplete.

Similar to the above.

Beginning:

अस्य श्रीगणपतिमन्त्रस्य गणक ऋषिः, देवी गायत्री छन्दः, महागणपतिर्देवता, ग्लां बीजं, ग्लीं शक्तिः, ग्लूं कीलकं, मम सर्वाभीष्ट-फलसिद्ध्यर्थे जपे विनियोगः ।

End:

लम्बोदरं दशभुजमेकदंष्ट्रं गजाननम्.

No. **6885.** महागणपतिमन्त्रः.

MAHĀGAṆAPATIMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 15*a* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमहागणपतिमन्त्रस्य गणक ऋषिः, गायत्री छन्दः, श्रीमहागणपतिर्देवता ; गं बीजं, स्वाहा शक्तिः, श्रीमहागणपतिसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये सर्वजनं मम वशमानय स्वाहा । पुनर्ध्यानं पञ्चोपचारश्च ॥

No. **6886.** महाचिन्तामणिमन्त्रः.

MAHĀCINTĀMAṆIMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 320b of the MS described under No. 5477, wherein this is included in Mantramālikā mentioned in the list of other works given therein.

Complete.

This Mantra is addressed to Viṣṇu's discus; and its repetition is believed to have the power to enable one to drive away all kinds of evil spirits.

Beginning:

ओं नमो भगवते महाचिन्तामणये महावीर्यपराक्रमदिनकरसहस्रवरभूषाय राक्षसग्रहस्कन्दग्रहविनायकग्रहलोकग्रहदुष्टग्रहआवेशग्रहापस्मारग्रहतीव्रग्रहसूतीग्रहादीन् हन हन ।

End:

सर्वभूतानि त्रासय त्रासय मां रक्ष मां रक्ष मां रक्ष हुं फट् स्वाहा ॥

इदं सुदर्शनमहाचिन्तामणिद्वयं मन्त्रशिखामणिः इदं परमरहस्यमिति

No. 6887. महात्रिपुरसुन्दरीपञ्चदशाक्षरीमन्त्रः.

MAHĀTRIPURASUNDARĪPAÑCADAŚĀKṢARĪ-MANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 230*a* of the MS. described under No. 581, where this is included in the Mantramālikā mentioned in the list of the other works.

Complete.

This Mantra consisting 15 syllables is addressed to Tripurasundarī, the great, and is intended to secure her favour.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीपञ्चा(ञ्चदशा)क्षरीमन्त्रस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिश्छन्दः, श्रीमहात्रिपुरसुन्दरी परमेश्वरी देवता, कामराजात्मकं बीजं, तार्तीयं शक्तिः, प्रथमसम्भवं कीलकं, मम महात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे विनियोगः ।

End:

मन्त्रः पञ्चदशाक्षरी ।

नवलक्षप्रमाणं तु जप्त्वा त्रिपुरसुन्दरीम् ।
विधिवज्जायते मन्त्री रुद्रमूर्तिरिवापरः ॥

No. 6888. महात्रिपुरसुन्दरीपञ्चदशाक्षरीमन्त्रः.

MAHĀTRIPURASUNDARĪPAÑCADAŚĀKṢARĪ-MANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 86*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 6889. महात्रिपुरसुन्दरीमन्त्रः.

MAHĀTRIPURASUNDARĪMANTRAḤ.

Pages, 13. Lines, 18 on a page.

Begins on fol. 59*a* of the MS. described under No. 424, wherein this is called Dēvīmantranyāsa in the list of the other works given therein ; Dēvyakṣaranyāsa and Puṣpāñjali mentioned there are included in the work here described.

Complete.

Similar to the above. This Mantra forms part of the ritual relating to the worship of Tripurasundarī. At the end there are two pages of matter describing in Telugu the means to enable one to bring another under one's own control.

Beginning :

अस्य श्रीमहात्रिपुरसुन्दरीमन्त्रस्य आनन्दभैरव ऋषिः, पङ्क्तिश्छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, मम श्रीमहात्रिपुरसुन्दरीप्रीत्यर्थे जपे विनियोगः ।

End :

ह स क ल र डैं, ह स क ल र डीं, ह स क ल र डां श्रीमहात्रिपुरभैरवीश्रीपादुकायै नमः ।

* * * *

योनिं देवताबुद्ध्या संपूज्य संतर्प्य भोगपात्रं कारणपूर्णं करेणादाय ।

No. 6890. महात्रिपुरसुन्दरीमन्त्रराजमन्त्रः.

MAHĀTRIPURASUNDARĪMANTRARĀJAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 234*a* of the MS. described under No. 124, where this is included in the Ṣaḍāmnāyamantra 228*b* mentioned in the list of other works.

Complete.

This Mantra is considered to be the most important of the Mantras addressed to the goddess Tripurasundarī conceived as Śakti.

Beginning:

अस्य श्रीमहात्रिपुरसुन्दरीमन्त्रराजमहामन्त्रस्य आनन्दभैरव ऋषिः, अनुष्टुप् छन्दः, श्रीमहात्रिपुरसुन्दरी महाशक्तिर्देवता, ऐं क ए ई ल ह्रीं बीजं, सौः स क ल ह्रीं शक्तिः, क्लीं ह स क ह ल ह्रीं कीलकं, मम श्रीमहात्रिपुरसुन्दरीमहाशक्तिप्र——गः ।

End:

क ए ई ल ह्रीं, ह स क ह ल ह्रीं, स क ल ह्रीं ॥

No. 6891. महात्रिपुरसुन्दरीमन्त्रशेषः.

MAHĀTRIPURASUNDARĪMANTRAŚĒṢAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 87*b* of the MS. described under No. 537.

Incomplete.

This Mantra also is addressed to the goddess Tripurasundarī, the great.

Beginning:

ऐं क्लीं ह्रीं त्रिपुरे भगवति स्वाहा इति द्वादशाक्षरं कुरुकुल्लामन्त्रं त्रिर्जप्य मूर्ध्नि, ओं ३ इत्येकाक्षरसेतुमन्त्रं त्रिर्जपेत् कण्ठे ।

ओं ह्रीं ३ इति महासेतुमन्त्रं त्रिः कण्ठे। ओं अं क. २४ ।

End:

धं चापाय नमः, आं आं पाशाय नमः, क्रों क्रों अङ्कुशाय नमः.

No. 6892. महापञ्चकन्यासः.

MAHĀPAÑCAKANYĀSAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 28*b* of the MS. described under No. 2886.

Complete.

On the ceremonial touching of certain parts of the body while uttering at the same time the letters of the Gāyatrīmantra. This is considered to be efficacious in removing the five kinds of deadly sins known collectively as Pañcamahāpātakas.

Beginning :

अथ महापञ्चकन्यासः—

तत्कारस्य केशवनामधेयं, प्रह्लाद ऋषिः, गायत्री छन्दः, अग्निर्देवता; आं बीजं, प्रह्लादिनी शक्तिः, पृथ्वीतत्त्वं, चम्पकवर्णः, उदात्त स्वरः, सुमुखमुद्रा, सर्वपापविनाशनं, अं कीलकं, पादाङ्गुष्ठयोर्न्यसेत् ।

तत्कारं चम्पकापीतं ब्रह्मविष्णुशिवात्मकम् ।
शान्तं पद्मासनारूढं ध्यात्वा दहति पातकम् ॥

तत्काराय नमः ।

End :

एवं न्यासं प्रकुर्वाणः यत्र देशे स तिष्ठति ।
तत्र क्षेत्रे परं ब्रह्म दशयोजनमायतम् ॥

No. **6893.** महापादुकामन्त्रः

MAHĀPĀDUKĀMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 135*a* of the MS. describel under No. 537.

Complete.

This Mantra is in praise of the holy sandals of the Śākta-gurus. This is considered to be equivalent to praising the Gurus themselves.

Beginning :

अस्य श्रीमहापादुकामन्त्रस्य भगवान् सदाशिव ऋषिः, पङ्क्तिश्छन्दः, श्रीमहापादुका देवता ; ऐं ह्रीं श्रीं इति बीजं, ऐं क्लीं सौः इति शक्तिः, ऐं ग्लौमिति कीलकं, श्रीमहापादुकाप्रीत्यर्थे विनियोगः ।

End :

वदेति जगदीशानीं श्रीगुर्वङ्घ्रियुगत्रयम् ।
सर्वसिद्धिप्रदां देवीं श्रीमहापादुकां भजे ॥

ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं ग्लौं हस्ल्फ्रं ह स क्ष म ल व र यूं शेषं पूर्ववत् ॥

No. 6894. महापाशुपतास्त्रमन्त्रः.
MAHĀPĀŚUPATĀSTRAMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 294*a* of the MS. described under No. 5477, where this is included in the Mantramālikā mentioned in the list of other works.

Complete.

This Mantra is addressed to the Pāśupatāstra; and its repetition is believed to be efficacious in removing all kinds of evils and calamities.

Beginning:

न्यासध्यानं पूर्ववत्। मन्त्रः—

ओं नमो भगवते अतुलबलपराक्रमाय त्रिपञ्चनयनरूपाय नाना-प्रहरणोद्यो(द्य)तकर[ण]ाय सर्वाङ्गवक्त्राय भिन्नाञ्जनप्रख्याय ।

End:

द्रावय द्रावय सर्वदुरितान् नाशय नाशय हुं फट् स्वाहा ॥

Colophon:

इति पाशुपतास्त्रं सम्पूर्णम् ॥

No. 6895. महाबाणन्यासः.
MAHĀBĀṆANYĀSAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 51*b* of the MS. described under No. 424.

Complete.

On the ceremonial touching of certain parts of one's body, after conceiving oneself to be Manmatha (the god of love), while repeating at the same time the appropriate letters denoting the names of his five arrows.

Beginning:

आत्मानं मन्मथं भावयित्वा झ्रौं चापाय नमः—इति भ्रुवोश्चापं न्यस्य, ज्यां ज्यायै नमः––इति नेत्रयोः ज्यां विन्यस्य, द्रां द्रावण बाणाय नमः द्राविण्यै नमः।

End:

कोदण्डमिक्षुवरमेकशरं च पौष्पं चक्राब्जहस्तसृणिकाश्चनवंशनालम्।
बिभ्राणमष्टविधबाहुभिरर्कवर्णं ध्यायेद्धरिं मदनगोपविलासवेषम्॥

No. 6896. महाभैरवीमन्त्रः.
MAHĀBHAIRAVĪMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 100*b* of the MS. described under No. 5566, wherein this has been omitted to be mentioned in the list of other works.

Complete.

This Mantra is addressed to the goddess Bhairavī, i.e., Bhairava's Śakti, conceived as a diety; and its repetition is intended to enable one to accomplish one's desires.

Beginning:

अस्य श्रीमहाभैरवीमन्त्रस्य कहोलक ऋषिः, ककुत् छन्दः, श्रीमहाभैरवी देवता, ओं बीजं, हुं शक्तिः, स्वाहा कीलकं, ममाभीष्टसिद्ध्यर्थे विनियोगः॥

See under the next number for the end.

No. 6897. महाभैरवीमन्त्रः.
MAHĀBHAIRAVĪMANTRAḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 253*b* of the MS. described under No. 581, where this is included in the Mantramālikā 229*a* mentioned in the list of other works.

Complete.

Similar to the above.

See under the previous number for the beginning.

End:

ओं नमो भगवति महाभैरवि घम घम रह रह डम डम हुं स्वाहा ॥

No. 6898. महाभैरवीमन्त्रः.
MAHĀBHAIRAVĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 300*b* of the MS. described under No. 5477, where this has been included in the Mantramālikā 273*a* mentioned in the list of other works.

Complete.

Similar to the above.

For the beginning, see under the previous number.

End:

ओं नमो भगवति महाभैरवि घम घम घम ठः ठः ठः दम दम दम हुं फट् स्वाहा ॥

चत्वारिंशत्सहस्रं पुनश्चरणं दशांशहोमतर्पणमिति ॥

No. 6899. महामायामन्त्रः.
MAHĀMĀYĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 45*b* of the MS. described under No. 2886.

Complete.

This Mantra is addressed to the goddess Śakti, conceived as casting the veil of illusion on all things, so that what is real appears unreal and what is really unreal appears to be real.

Beginning:

महामायायाः परब्रह्म, त्रिष्टुप्, परा शक्तिर्देवता ।

End:

ओं ह्रीं भूं ह्रीं भुवः ह्रीं सुवः ह्रीं स्वाहा ॥
त्रिकोणं विलिखेत्पूर्वं तद्बहिर्वृत्तमालिखेत् ।

* * * *

भूपुरे विलिखेत्साध्यं मध्यदृष्टदिशाप्रति ॥
कृष्णपुष्पैः पूजा ॥

No. 6900. महामारीस्तोत्रमन्त्रः.

MAHĀMĀRĪSTŌTRAMANTRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 6025.

Complete.

This Mantra is in praise of the goddess Mahāmārī who is probably the same as the Tamil Māriyamman, the presiding deity of small-pox and such other epidemic diseases.

Beginning:

अस्य श्रीमहामारीस्तोत्रमन्त्रस्य कनकरुद्र ऋषिः, पङ्क्तिश्छन्दः, महामारी देवता ; मं बीजं, क्लीं शक्तिः, ह्रौं कीलकं, मम महामारीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं ज्वल ज्वल ज्वालामुखि ज्वालामालिनि ओं महामारि अत्रागच्छ अत्र तिष्ठ शं शक्तिः शाम्भवि शान्तं कुरु कुरु जटाना(गन्ना)यिके ह्रीं ह स क ह ल ह्रीं मदशोणिते महामारि ग्रामं रक्ष रक्ष श्रीं श्रेयस्मि तुष्टिं करोमि स्वाहा ॥

No. 6901. महार्धाम्बामन्त्रः.

MAHĀRDHĀMBĀMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 20*b* of the MS. described under No. 5673, where this has been included in the Āmnāyamantra-mālikā 1*a* mentioned in the list of other works.

Complete.

This Mantra is intended to propitiate Ambā or Śakti conceived as forming one-half of the body of Śiva.

Beginning:

अस्य श्रीमहार्धाम्बामन्त्रस्य चिदानन्दभैरव ऋषिः, जगती छन्दः, श्रीमहार्धाम्बा देवता; ऐं बीजं, ई शक्तिः, सौः कीलकं, मम श्रीमहार्धाम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

ऐं ई सौः क ए ई ल ह्रीं, ह स क ह ल ह्रीं स क ल ह्रीं सं सृष्टिनित्ये स्वाहा, हं स्थितिपूर्णे नमः, ई महासंहारिणे कृशे चण्डकाली फट्, [ह्रीं हूल्स्फ्रें महाघोरे अनन्गभास्करे महाचण्डकाली फट्] ह्रल्स्फ्रें महाचण्डयोगीश्वरी ऐं ह्रीं श्रीं हूल्स्फ्रे हूसें स्हौं हूल्स्फ्रें श्रीं ह्रीं ऐं श्रीमहार्धाम्बा श्री ॥

No. 6902. महार्धाम्बामन्त्रः.

MAHĀRDHĀMBĀMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 232*a* of the MS. described under No. 1?4, where this has been included in the Ṣaḍāmnāyamantra 228*b* mentioned in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमहार्धामन्त्रस्य चिदाकाशानन्दभैरव ऋषिः, अतिजगती छन्दः, महार्धा देवता, ऐं बीजं, ई शक्तिः, सौः कीलकं, महार्धाप्र—गः।

End:

चण्डकाली फट्, हं स्थितिपूर्णे नमः, सं सृष्टिनित्ये स्वाहा, ह स क (ह) ल ह्रीं स्प्रें धाम ह्ल्स्फ्रें महार्धाम्बा दिव्यश्री—मि नमः ॥

No. 6903. महार्धामन्त्रः.

MAHĀRDHĀMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 7*b* of the MS. described under No. 673, wherein this has been included in the Ṣaḍāmnāya mentioned in the list of other works.

Complete.

Similar to the above. Ardhā is the same as Ardhāmbā.

Beginning:

अस्य श्रीमहार्धामहामन्त्रस्य चिदानन्दभैरव ऋषिः, जगती छन्दः, महार्धा देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकं, मम महार्धाप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

End:

सं सृष्टिनित्ये स्वाहा स क ल ह्रीं, सौः ई ऐं महार्धाश्रीपा—नमः ॥

No. 6904. महालक्ष्मीकवचम्.

MAHĀLAKṢMĪKAVACAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 9*b* of the MS. described under No. 2886.

Complete.

Addressed to Mahālakṣmī, and believed to have the power to enable one to accomplish one's objects and to removes in and misery.

Beginning:

शुकं ब्रह्मोवाच—

महालक्ष्म्याः प्रवक्ष्यामि कवचं सर्वकामदम् ।
सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ॥

* * * *

महालक्ष्मीश्शिरः पातु ललाटं मम पङ्कजा ।
कर्णौ रक्षेद्रमा पातु नयने नलिनालया ॥

End:

एवं देवीप्रभावेन शुकः कवचमाप्तवान् ।
कवचानुग्रहेणैव सर्वान् कामानवाप्नुयात् ॥

* * * *

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्भुजैः
हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ।
बिभ्रन्तीं(भ्राणां)श्रियमब्जयुग्ममभयां हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बबिम्बललितां वन्देऽरविन्दस्थिताम् ॥

No. 6905. महावाक्यमन्त्रः.
MAHĀVĀKYAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 16*a* of the MS. described under No. 5854.

Complete.

This Mantra consists of four well-known Upaniṣadic sentences known as Mahāvākyas, the object to be attained by their repetition being the realization of the unity of the finite soul with the absolute Brahman.

Beginning:

नारायणं पद्मभुवं वसिष्ठं शक्तिञ्च तत्पुत्रपराशरञ्च ।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
तं शङ्कराचार्यमथास्य पद्मपादञ्च हस्तामलकञ्च शिष्यम् ।
तं त्रोटकं वार्तिककारमन्यानस्मद्गुरून् सन्ततमानतोऽस्मि ॥

शं नो मित्रश्शं वरुणः—अवतु वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः । महावाक्यमन्त्रन्यासः । अस्य श्रीमहावाक्यमन्त्रस्य हंस ऋषिः, सत्यो देवता, अव्यक्तगायत्री छन्दः, हं बीजं, सः शक्तिः, सो हं जीवब्रह्मैक्यार्थे जपे विनियोगः ।

End:

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥

ओं तत्सत् । ओं शं नो मित्रश्शं वरुणः । आवीद्वक्तारम् । ओं शान्तिश्शान्तिश्शान्तिः ॥

No. 6906. महावाक्यमन्त्रः.
MAHĀVĀKYAMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2423.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमहावाक्यमहामन्त्रस्य परमहंसपरब्रह्म ऋषिः; अव्यक्ता गायत्री छन्दः, परमहंसपरमात्मा देवता; हं बीजं, सः शक्तिः, सो हं कीलकं, मम परमहंसप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

तत्त्वमसि । अयमात्मा ब्रह्म । प्राणोऽस्मि प्रज्ञात्मा । ब्रह्मज्योतिरहम् ॥

No. 6907. महाविद्यानवविद्यानवदुर्गाप्रत्यङ्गिरामन्त्रः.
MAHĀVIDYĀNAVAVIDYĀNAVADURGĀPRATYAṄGIRĀMANTRAḤ.

Pages, 35. Lines, 5 on a page.

Begins on fol 90*a* of the MS. described under No. 235, wherein this is called Mahāvidyā in the list of other works.

Complete.

This Mantra is chiefly addressed to Navadurgā, and is intended to secure the favour of that deity. It contains also a number of Mantras relating to various deities. All these Mantras are probably collectively called Mahāvidyāmantras.

Beginning:

अस्य श्रीमहाविद्यानवविद्यानवदुर्गाप्रत्याङ्गिरामहामन्त्रस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, अन्तर्यामिनारायणी किरातधरवनदुर्गा ईश्वरी देवता, दुं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, महाविद्यानवविद्यावनदुर्गा-प्रत्याङ्गिराप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ।

दुर्गायै नमः--

ओं कालदण्डकृतां विद्यां रक्तलोचनमूर्धजाम् ।

* * * *

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

No. 6908. महाविद्यावनदुर्गामन्त्रः.
MAHĀVIDYĀVANADURGĀMANTRAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 5572, wherein this is called Mahāvidyāmantra.

Complete.

This Mantra is addressed to Vanadurgā who is a manifestation of Pārvatī. The name Vanadurgā indicates that the goddess is to be conceived as generally residing in a forest.

Beginning:

अस्य श्रीमहाविद्यामन्त्रस्य शिरसि मृत्युञ्जय ऋषिः, मुखे गायत्री त्रिष्टुप् अनुष्टुप् बृहती पङ्क्तिश्छन्दांसि, हृदये ब्राह्मीत्यादिनवशक्तयो

देवताः, महादेवो देवता; दुं बीजं, ह्रीं शक्तिः, क्रों कीलकं, महाविद्याप्रीत्यर्थे जपे विनियोगः । ह्रामित्यादिषडङ्गन्यासः । ध्यानम्—

उद्यद्भास्वत्समाभां . . . . . नमामि ॥

अस्य श्रीमहाविद्यामन्त्रस्य शिरसि अन्तर्यामी ऋषिः, मुखे दैवी गायत्री छन्दः, हृदये श्रीवनदुर्गा देवता; ऐं बीजं, ह्रीं शक्तिः, क्रों कीलकं, महाविद्यार्थे विनियोगः ।

End:

पञ्चयोजनविस्तीर्णे मृत्योश्च भुजमण्डले ।
तस्माद्रक्ष महाविद्ये भद्रकालि नमोऽस्तु ते ॥

जातवेदसे सुनुवाम सोम . . . . श‍ृणुयाम देवाः—दधातु ॥

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निसुम्भापहे
सुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

No. **6909.** महाविद्यावनदुर्गामन्त्रः.

MAHĀVIDYĀVANADURGĀMANTRAḤ

Pages, 41. Lines, 18 on a page.

Begins on fol. 65*b* of the MS. described under No. 5586.

Incomplete.

Similar to the above.

Beginning:

अस्य श्रीमहाविद्यानवविद्यानवदुर्गाप्रत्यङ्गिरामहामन्त्रस्य अरण्येश्वर ऋषिः, अत्यनुष्टुप् छन्दः, अन्तर्यामिनारायणी किरातधरवनदुर्गा ईश्वरो देवता ; दुं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, महाविद्यानवविद्यावनदुर्गाप्रत्याङ्गिराप्रसादासिद्ध्यर्थे जपे विनियोगः ॥

See under the previous number for the end.

No. 6910. महाविद्यावनदुर्गास्तोत्रमन्त्रः.

MAHĀVIDYĀVANADURGĀSTŌTRAMANTRAḤ.

Pages, 68. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5987.

Complete.

The repetition of this Mantra, which is also addressed to Vanadurgā, is believed to be efficacious in removing all sorts of diseases, in driving off evil spirits and in the accomplishment of one's desires.

Beginning:

अस्य श्रीमहाविद्यावनदुर्गास्तोत्रमन्त्रराजमहामन्त्रस्य अरण्येश्वर ऋषिः, अत्य[न्ता]नुष्टुप् छन्दः, ... किरातरूपधर ईश्वरो देवता; ओं दुं बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम श्रीवनदुर्गाप्रसादसिद्ध्यर्थे सर्वाभीष्टसिद्ध्यर्थे रोगकृत्रिमस्फोटकज्वरपरमन्त्रपरयन्त्रपरतन्त्रपरप्रयोगादिसर्वग्रहोच्चाटनार्थे मम इष्टसिद्ध्यर्थे जपे विनियोगः ।

End:

महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

ओं ह्रीं श्रीं ब्लूं ब्रह्मकोशिनि मां रक्ष रक्ष हुं फट् स्वाहा ।

ओं वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥

शन्नो मित्रश्शं वरुणः । . . . . आवीद्वक्तारम् ।

ओं शान्तिश्शान्तिश्शान्तिः । पुनश्चरणविधानात् एकविंशतिवारं पारायणानि कुर्यात् ॥

Colophon:

इति पुनश्चरणविधिः ॥

No. 6911. महावीरप्रतापहनूमन्मालामन्त्रः.
MAHĀVĪRAPRATĀPAHANŪMANMĀLĀMANTRAḤ

Page, 1. Lines, 18 on a page.

Begins on fol. 18*a* of the MS. described under No. 2886.

Complete.

The repetition of this Mantra which is addressed to Hanūmat is believed to be efficacious in counteracting the harm caused by evil spirits and the evils coming from various quarters.

Beginning :

ओन्नमो भगवते महावीरप्रतापहनूमते कोटिसूर्यप्रकाशाय वेदशास्त्रप्रमोदाय ऋग्यजुस्सामाथर्वणस्वरूपाय बालब्रह्मचारिणे सुवर्णयज्ञोपवीताय ।

End :

सर्वग्रहबन्धनाय सर्वदिग्बन्धनाय ओन्नमो भगवते हुं फट् स्वाहा । वीरहनूमते हुं फट् स्वाहा ॥

No. 6912. महाशरभमन्त्रः.
MAHĀŚARABHAMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 238*b* of the MS. described under No. 581, where this is included in the Mantramālikā mentioned in the list of other works.

Complete.

This Mantra is addressed to Śiva in his peculiar beast-and-bird form. Its repetition is intended to enable one to accomplish the four Puruṣārthas or principal aims of life, viz., Dharma, Artha, Kāma and Mōkṣa.

Beginning :

अस्य श्रीमहाशरभमन्त्रस्य त्रिपुरान्तक ऋषिः, त्रिष्टुप् छन्दः, त्रिपुरसंहारमहारुद्रो देवता, मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः ।

End :

मन्त्रः—

ओं नमोऽष्टपादाय द्विशिरसाय द्विनेत्रत्रयाय द्विपक्षाय सपुच्छाय अग्निवर्णाय मृगाविहगरूपाय श्रीवीरशरभाय नमः ॥

No. 6913. महाशरभमन्त्रः.
MAHĀŚARABHAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 92*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 6914. महाशास्तामन्त्रः.
MAHĀŚĀSTĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 300*a* of the MS. described under No 5477, where this is included in Mantramālikā mentioned in the list of other works.

Complete.

The repetition of this Mantra, which is addressed to Śāstā, a village deity popularly known in Southern India as Ayyanār in Tamil, is believed to be efficacious in securing the accomplishment of one's desires.

Beginning :

अस्य श्रीमहाशास्तामन्त्रस्य रुद्र ऋषिः, अनुष्टुप् छन्दः, श्रीमहाशास्ता रुद्रो देवता, ओं हं बीजं, स्वाहा शक्तिः, मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः ।

End :

ओं ऐं क्लीं ह्रीं श्रीं क्ष्रीं श्रीं क्ष्रीं महाशास्ता रुद्रायार्थलाभाय पुत्रलाभाय शत्रुनाशाय.

*　　*　　*　　*

महाशास्ताय नमः । यन्त्रम्—

षट्कोणं विलिख्य तन्मध्ये साध्यनाम विलिख्य कोणेषु श्रीं ह्रीं श्रीं . . . . प्रसादितस्वाहा । अनेन मन्त्रेण अष्टवारं विभूतिमभिमन्त्र्य हस्ते धारयेत् इति ॥

No. 6915. महाशास्तामन्त्रः.
MAHĀŚĀSTĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 253*a* of the MS. described under No. 581, wherein this is included in the Mantramālikā 229*a* mentioned in the list of other works.

Complete

Similar to the above

Beginning :

अस्य श्रीमहाशास्तामन्त्रस्य रुद्र ऋषिः, अनुष्टुप् छन्दः, . . . शक्तिः, मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः ।

End :

ओं ऐं ह्रीं सौं क्लीं श्रीं ह्रीं ह्रूं क्लीं हरिहरपुत्राय अर्थलाभाय पुत्रलाभाय शत्रुनाशाय सर्वस्त्रीमोहनाय मदगजतुरङ्गवाहनाय महाशास्ताय नमः ॥

No. 6916. महाशास्तामन्त्रः.
MAHĀŚĀSTĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 104*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 6917. महाशास्तामन्त्रः.
MAHĀŚĀSTĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 2424.

Complete.

Similar to the above.

Believed to be efficacious also in bringing people under one's magic control and in driving out evil spirits, etc.

Beginning:

अस्य श्रीमहाशास्तामन्त्रस्य महादेव ऋषिः, अनुष्टुप् छन्दः, महाशास्ता देवता, श्रीं बीजं, स्वाहा शक्तिः, मम वश्याकर्षणार्थे जपे विनियोगः ॥

End:

ओं श्रीं हरिहरपुत्राय पुत्रलाभाय शत्रुनाशाय मदगजवाहनाय महाशास्ताय ह्रीन्नमः ॥

No. 6918. महाशूलिनीमन्त्रः.

MAHĀŚŪLINĪMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 8*b* of the MS. described under No. 6025.

Complete.

This Mantra is addressed to Śakti conceived as holding a spear in her hand; and its repetition is believed to be efficacious in counteracting the harm caused by evil spirits and by hostile Mantras and Tantras.

Beginning:

अस्य श्रीमहाशूलिनीमहामन्त्रस्य दीर्घतमा ऋषिः, ककुप्(त्) छन्दः, प्रतिक्रियाशूलिनी देवता, दुं बीजं, स्वाहा शक्तिः, फट् कीलकं, सकलग्रहकृत्रिमपरमन्त्रयन्त्रतन्त्रविच्छेदनार्थे जपे विनियोगः ।

End:

बिभ्राणा शूलबाणास्यभयवरगदाचापपाशान् कराग्रैः
मेघश्यामा किरीटोल्लसितशशिकला भीषणा भूषणाढ्या ।

सिंहस्कन्धाधिरूढा चतसृभिरसिखेटान्विताभिः परीता
कन्याभिर्भिन्नदैत्या भवतु भवभयध्वंसिनी शूलिनी सा ॥
पञ्चपूजां कुर्यात् ॥

No. 6919. महाषोढाद्वयीन्यासः.
MAHĀṢŌḌHĀDVAYĪNYĀSAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 45*b* of the MS. described under No. 673, where this has been included in the Ṣadamnāya 1*a*, mentioned in the list of other works.

Complete.

On the ceremonial touching of certain parts of the body twice six times, while repeating the Mantra formulas herein given. This kind of Nyāsa is held to be able to confer prosperity on one.

Beginning:

जातियुक्तेन बीजेन षडङ्गन्यासमाचरेत् ।
ओं ऐं ह्रीं श्रीं हसौं सहौं हं सो हृदयाय नमः ।

End:

महाषोढाद्वयीन्यासो यत्करोति दिनेदिने ।
देवास्सर्वे नमस्यन्ति तं नमामि न संशयः ॥
* * * *
तत्रस्थो विजयो लाभः सम्मानं पुरुधा प्रिये ।
तन्मां मृत्युमवाप्नोति यदि त्राता शिवस्स्वयम्(?) ॥

Colophon:

इति महाषोढान्यासः सम्पूर्णः ॥

No. 6920. महासुदर्शनमन्त्रः.
MAHĀSUDARŚANAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 226*b* of the MS. described under No. 537.
Complete.

This Mantra is addressed to Viṣṇu's discus; and its repetition is believed to secure protection to one from evil spirits, etc

Beginning:

ओं नमो भगवते महासुदर्शनाय चक्ररूपाय सर्वत्र मां रक्ष रक्ष हुं फट् स्वाहा ।

End:

सर्वदुष्टग्रहान् छिन्धि छिन्धि ह ह ह ह हि हि हि ॥

No. 6921. महासौराष्टाक्षरीमन्त्रः.

MAHĀSAURĀṢṬĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 23 on a page.

Begins on fol. 179*a* of the MS. described under No. 446.

Complete.

This Mantra consisting of eight syllables is intended to propitiate the sun-god.

Beginning:

अस्य श्रीमहासौराष्टाक्षरीमहामन्त्रस्य देवभाग ऋषिः, गायत्री छन्दः, श्रीसूर्यनारायणो देवता; ओं घृणिरिति बीजं, सूर्येति शक्तिः- आदित्य इति कीलकं, मम श्रीसूर्यनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं घृणिस्सूरिय आदित्योम्, अष्टलक्षजपासिद्धिः । पायसतिलार्क, समिधा(दा)ज्यहोमेन सर्वकार्यसिद्धिः । रक्तगन्धरक्तपुष्पगुडोदकक्षीर- शुद्धोदकतर्पणेन जपदशांशतर्पणहोमब्राह्मणसमाराधनेन सर्वारिष्टशान्तिर्भ- वति ॥

No. 6922. मातङ्गीकवचः.

MĀTAṄGĪKAVACAḤ.

Pages, 2. Lines, 24 on a page.

Begins on fol. 122*b* of the MS. described under No. 5643.

Complete.

This Mantra is addressed to Mātaṅgī, who is probably a manifestation of Śakti ; and its repetition is believed to secure her help and protection and thus enable a person to accomplish his desires. The concluding stanzas describe well the religious efficacy of this Mantra.

Beginning:

अस्य श्रीमातङ्गीकवचमन्त्रस्य महायोगीश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीराजमातङ्गी देवता, विनियोगः ।

शिखां मे श्यामला पातु मातङ्गी मे शिरोऽवतु ।
ललाटं पातु चण्डाली भ्रुवौ मे मदशालिनी ॥

End:

महालक्ष्मीर्मम धनं विश्वमाता सुताम(न्म)म ।
श्रीमातङ्गीश्वरी नित्यं मां पातु जगदीश्वरी ॥
मातङ्गीकवचं नित्यं य एतत्प्रपठेन्नरः ।
स खित्वं(जित्वा)सकलान् लोकान् दासीभूतान् करोत्यसौ ॥

* * * *

सर्वान् कामानवाप्नोति महाभोगांश्च दुर्लभान् ।
मुक्तिमन्ते समाप्नोति साक्षात्परशिवो भवेत् ॥

No. 6923. मातङ्गीकवचः.
MĀTANGĪKAVACAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 168*a* of the MS. described under No. 124, wherein it is omitted to be included among the other works given therein.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमातङ्गीकवचमन्त्रस्य महायोगीश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीराजमातङ्गी देवता, विनियोगः ।

* * * *

शिखां मे श्यामला पातु मातङ्गी मे शिरोऽवतु ।
ललाटं पातु चण्डाली भ्रुवौ मे मदशालिनी ॥

End:

श्रीमातङ्गीश्वरी नित्यं मां पातु जगदीश्वरी ।
मातङ्गीकवचं नित्यं य एतत्प्रपठेन्नरः ॥

*　　*　　*　　*

सर्वान् कामानवाप्नोति महाभोगांश्च दुर्लभान् ।
मुक्तिमन्ते समाप्नोति साक्षात्परशिवो भवेत् ॥

No. **6924.** मातङ्गीश्वरीमन्त्रः.

MĀTAṄGĪŚVARĪMANTRAḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 230*b* of the MS. described under No. 581, where it is included in the Mantramālikā 229*a* mentioned in the list of other works.

Complete.

This Mantra is also addressed to the goddess Mātaṅgī and is understood to be efficacious in securing the accomplishment of the four Puruṣārthas.

Beginning:

अस्य श्रीमातङ्गीश्वरीमन्त्रस्य मतङ्ग ऋषिः, अमितच्छन्दः, श्रीमातङ्गीश्वरी देवता, ऐं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, महा(म)चतुर्विध-पुरुषार्थ(सिद्ध्यर्थे) विनियोगः ।

End:

मन्त्रः—

ह्रीं श्रीं क्लीं ऐं उच्छिष्टचण्डालि मातङ्गि सर्वजनवशीकरि क्लीं सौः स्वाहा ॥

No. 6925. मातङ्गीश्वरीमन्त्रः.

MĀTAṄGĪŚVARĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 87*a* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 6926. मातङ्गीश्वरीमन्त्रः.

MĀTAṄGĪŚVARĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 274*b* of the MS. described under No. 5477, where this is included in the Mantramālikā 273*a*, mentioned in the list of other works.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमातङ्गीश्वरीमन्त्रस्य मतङ्ग ऋषिः, अमितच्छन्दः, श्रीमातङ्गीश्वरी देवता; ऐं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, मम चतुर्विधपुरुषार्थसिद्धयर्थे जपे विनियोगः ।

End:

ऐं श्रीं ओं नमो भगवति मातङ्गेश्वरि सर्वजनमनोहरि.

* * * *

सर्वलोकममुकं मे वशमानय स्वाहा ।

लघुश्यामरु(ाया)मतान्तरे मन्त्रः—

ऐं क्लीं ह्रीं श्रीं उच्छिष्टचण्डालि मातङ्गि सर्वजनवशंकरि स्वाहा ॥

Colophon:

इति मातङ्गी ॥

No. 6927. मातृकान्यासः.

MĀTṚKĀNYĀSAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 3*b* of the MS. described under No. 5786.

Complete.

On the ceremonial touching of certain parts of the body, while repeating each of the letters of the alphabet along with a name denoting Viṣṇu.

Beginning:

एषामेकपञ्चाशन्मातृकामन्त्राणामन्तर्यामी ऋषिः, दैवी गायत्री छन्दः, अनादिरूपी श्रीलक्ष्मीनारायणो देवता; मातृकान्यासे विनियोगः ।

* * * *

अं अजाय नमः शिरसि, आं आनन्दाय नमः मुखे ।

End:

इत्येते एकपञ्चाशद्वर्णदेवताः ।

ऋषिर्गुरुत्वाच्छिरसैव धार्यः छन्दोऽक्षरत्वात् व(द)नागतं स्यात् ।

धियावगन्तव्यतया सदैव हृदि प्रदिष्टा मनुदेवता या ॥

No. 6928. मातृकान्यासः.

MĀTṚKĀNYĀSAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 49*b* of the MS. described under No. 673.

Complete.

Different from the two previous Nyāsamantras. Here the touching of certain parts of the body is accompanied by the repetition of some of the letters of the alphabet along with a name denoting the goddess Śakti.

Beginning :

अथ मातृकान्यासः—

ओं ऐं ह्रीं श्रीं ह्सौं सहौं अं कं खं गं घं ङं अनन्तकोटि-भूचरकुलसेवितायै, आं कां मङ्गलाम्बादेव्यै ।

End :

यं रं लं वं शं षं सं हं ळं क्षं इति मातृकाभैरवाधिरूपायै श्री-पराम्बादेव्यै नमः—सर्वाङ्गं व्यापयेत् ॥

Colophon :

इति मातृकान्यासः ॥

No. **6929.** मातृकान्यासः.

MĀTṚKĀNYĀSAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 61*a* of the MS. described under No. 2886.

Complete.

This method of Nyāsa which is different from the one described under the previous number is particularly intended to please Sarasvatī.

Beginning :

अस्य श्रीमातृकान्यासमहामन्त्रस्य ब्रह्मऋषये नमः, गायत्रीछन्दसे नमः, मातृकासरस्वत्यै देवतायै नमः, हल्भ्यो बीजेभ्यो नमः, स्वरेभ्यः शक्तिभ्यो नमः, बिन्दुभ्यः कीलकेभ्यो नमः, मातृकासरस्वतीप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

End :

हं नमः हृदादिवामपादान्तं तद्वत् । ळं नमः हृदयादिगुह्यान्तं करतलेन । क्षं नमः हृदयादिमूर्धान्तं करतलेनेति शिवम् ॥

Colophon :

इति मातृकान्यासः ॥

No. 6930. मातृकामन्त्रः.
MĀTṚKĀMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 5786.

Complete.

This Mantra consists in the repetition of the letters of the alphabet combined with a name denoting Viṣṇu.

Beginning :

अथ मातृकामन्त्रः । ओं—इति प्राणायामः १२.
ओं भूः हृदयाय नमः, ओं भुवः शिरसे स्वाहा ।

* * * *

एषां मातृकामन्त्राणामन्तर्यामी ऋषिः, देवी गायत्री छन्दः, अजादिरुपी श्रीलक्ष्मीनारायणो देवता, नारायणप्रेरणया नारायणप्रीत्यर्थे मातृकामन्त्रजपे विनियोगः ।

End :

ओं अं अजाय नम इत्यादि क्षं श्रीलक्ष्मीनरसिंहाय नम इत्यन्तं जपः । उपसंहारः पूर्ववत् ॥

No. 6931. मातृकामन्त्रः.
MĀTṚKĀMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 229*a* of the MS. described under No. 581.

Complete.

This Mantra consists in the repetition of the letters of the alphabet combined with the Anusvāra, and this repetition, if accompanied by certain ceremonial acts, is believed to enable even a dumb person to become a poet and to win a good reputation.

Beginning :

अस्य श्रीमातृकामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमातृकासरस्वती देवता, हलो बीजानि, स्वराः शक्तयः, सकलमन्त्रानुष्ठानसिद्ध्यर्थे विनियोगः ।

End:

यं रं लं वं शं षं सं हं ळं क्षं एतया विद्यया त्रिवारमुदकमभिमन्त्र्य पिबेत् । मूकस्यापि कवित्वमष्टमासादर्वाक्, कीर्तिं लभते ॥

No. **6932.** मातृकामन्त्रः.

MĀTṚKĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 86*a* of the MS. described under No. 5566.

Complete.

Same as the above.

No. **6933.** मातृकासरस्वतीमन्त्रः.

MĀTṚKĀSARASVATĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 28*a* of the MS. described under No. 2886.

This Mantra relates to the ceremonial touching of certain parts of the body while repeating the letters of the alphabet. The mental touching, so to say, of the Ṣaṭcakras through contemplation is also indicated herein.

Beginning:

अस्य श्रीमातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, मातृकासरस्वती देवता; हल्भ्यो बीजेभ्यो नमः, स्वरा(रे)भ्यश्शक्तिभ्यो नमः, बिन्दुभ्यः कीलकेभ्यो नमः, ना(न्या)से विनियोगः ।

End:

आधारे वं नमः शं नमः षं नमः सं नम इत्यन्तर्मातृकान्यासं कृत्वा ततो गायत्रीजपं कुर्यात् ॥

No. 6934. मायादेवीकवचम्.
MĀYĀDĒVĪKAVACAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 15*b* of the MS. described under No. 2886.

Complete as found in the 32nd Adhyāya in Prayōgavijayasārāvalī.

Addressed to Māyādēvī for securing her favour and protection.

Beginning:

श्रीशिव उवाच—

अथ वक्ष्ये महागुह्यं कवचं सर्वसिद्धिदम् ।
समाहितेन मनसा शृणु कल्याणि तादृशीम् ॥

* * * *

ऋषिर्देव(व्या)स्तु कवचं(चे) मृत्युञ्जय उदाहृतः ।
उष्णिक् छन्दस्तथा देवि देवता जगदम्बिका ॥
ह्रीङ्कारं बीजमित्युक्तमोङ्कारं शक्तितत्परम् ।
आशु तादात्म्यसिद्ध्यर्थे विनियोगो वरानने ॥

* * * *

अथैश्वर्य(ग्र)तः पातु पृष्ठतो विजयेश्वरी ।
अजिता वामतः पातु दक्षिणं मेऽपराजिता ॥

End:

कवचेनावृतं विद्यात्संपूज्यं सकलैरपि ।
अनेनैव शरीरेण जीवन्मुक्तो भवेच्छिवे ॥

Colophon:

इति प्रयोगविजयसारावल्यां मायाकवचविधानं नाम द्वात्रिंशः पटलः ॥

No. 6935. मायामन्त्रः.
MĀYĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 45*a* of the MS. described under No. 2886.

Complete.

This Mantra is addressed to the goddess Māyā who is the Śakti of the Brahman and possesses the power of creation. She is called Māyā because she casts an illusion over all things so that what is real is seen to be unreal and what is unreal is seen to be real.

Beginning:

मायायाः मङ्कणः, उष्णिक्, महामाया तु, माया बी, माया शक्तिः, मायाकरणसिद्ध्यर्थे, माययैव षडङ्गम् ।

End:

स्वेच्छाकुतूहलं शीघ्रं दर्शयेति द्वयं यथा ।
ह्रीङ्कारस्वाहया युक्तं मन्त्रं पञ्चदशार्णकम् ॥
पञ्चाशत्सहस्रं जपः । सर्वं पूर्ववत् ॥

No. **6936.** मायामोहिनीमन्त्रः.
MĀYĀMŌHINĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 313*a* of the MS. described under No. 5477.

Complete.

The repetition of this Mantra which is addressed to Mōhinī is understood to have the power to enable one to bring under one's influence any woman with whom one may fall in love.

Beginning:

अस्य श्रीमायामोहिनीयक्षिणीमन्त्रस्य मन्मथ ऋषिः, त्रिष्टुप् छन्दः, मायामोहिनी देवता, क्लां बीजं, क्लीं शक्तिः, क्लं कीलकं, मम वाञ्छितकामिन्याकर्षणार्थे विनियोगः ।

End:

ओं क्लीं ह्रीं ओं नमो भगवति मोहिनि यक्षिणि सर्वस्त्रीवशङ्करि . . . . मायायक्षिणि सर्वस्त्रीः आकर्षयाकर्षय स्वाहा । लक्षजपः ॥

No. 6937. मालवीदुर्गामन्त्रः.

MĀLAVĪDURGĀMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 49*a* of the MS. described under No. 5445, wherein this Mantra is omitted to be given among the other works mentioned therein.

Complete.

This Mantra is addressed to the Durgā named Mālavīdurgā. It is stated in the end that if this Mantra is repeated during seven successive nights after observing certain ceremonials, one obtains a pot full of precious jewels.

Beginning :

ओं नमो हृदयाय नमः, भगवति शिरसे(स्वाहा), मालवि मालवि शिखायै वषट्, कुरु कुरु कवचाय हुं, कुमुदाञ्जनि नेत्रत्रयाय वौषट्, स्वाहा अस्त्राय फट् । ध्यानम्—

स्वर्णं हारमिषुं प्रसूनमभयं पाशं च संख्याक्रिया-
माह्वानं करपल्लवेषु दधतीमुद्यद्दिनेशप्रभाम् ।
सिन्दूराङ्कितरक्तदेहलतिकां देवीं सदाहं भजे
नानारत्नपरिष्कृतां त्रिणयनां रक्ताम्बरां मालवीम् ॥

ओं नमो भगवति मालवि मालवि कुरु कुरु कुमुदाञ्जनि स्वाहा ।

End :

तदन्तस्तन्मन्त्रवर्णान् विलिख्य, षोडशोपचारैरभ्यर्च्य, तत्कलशं तदुपरि निधाय, तत्समीपे सप्तरात्रं जपं कुर्यात् । अष्टमे दिने कांचित् स्त्रियं मालवीतोषणाय यथासुखमनुगच्छेत् । तत्कलशः मालवीप्रसाददिव्याभरणैः पूरितो भवति ॥

No. **6938.** मालिनीमन्त्रः.

MĀLINĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 7*b* of the MS. described under No. 5673.

Complete.

This Mantra is addressed to the goddess Mālinī who is a manifestation of Śakti. She is called Mālinī probably because she is conceived as wearing a necklace made up of skulls.

Beginning:

अस्य श्रीमालिनीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमालिनी देवता, हं बीजं, सः शक्तिः, सो हं कीलकं, मम मालिनीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

यं रं लं वं शं षं सं हं ळं क्षं मालिन्यम्बाश्री ॥

No. **6939.** मालिनीमन्त्रः.

MĀLINĪMANTRAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 26*a* of the MS. described under No. 2848.

Complete.

Similar to the above.

Beginning:

मालिनमिन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, मालिनी देवता, हं बीजं, सः शक्तिः, सो हं कील्कं, विनियोगः, आं ईं ऊं ऐं औं अः—इति न्यासः।

End:

पञ्चाशद्वर्णमन्त्रमालिन्यम्बाश्री ॥

No. 6940. मालिनीमन्त्रः.
MĀLINĪMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 8*b* of the MS. described under No. 673, wherein this Mantra is found in the Ṣaḍāmnāyamantras given as other work therein.

Complete.

Similar to tne above.

Beginning:

अस्य मालिनीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, मालिनी देवता, हं बीजं, सः शक्तिः, सो हं कीलकं, मालिनीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

अं—क्षं ५० मालिन्यम्बाश्रीपादुकां पूजयामि ॥

No. 6941. मालिनीमन्त्रः.
MĀLINĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 284*a* of the MS. described under No. 124, wherein this Mantra is found to be in the group of Mantras denoted by the general name of Ṣaḍāmnāyamantra given as other work therein.

Complete.

Similar to the above.

Beginning:

अस्य श्रीमालिनीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, मालिनी देवता, हं बीजं, सः शक्तिः, सो हं कीलकं, मालिनीप्र—गः । अं इत्यादिन्यासः ।

End:

पञ्चाशद्वर्णा एव मन्त्रः मालिनीमन्त्रदिव्यश्री—मः ॥

No. 6942. मालिनीमातृकान्यासमन्त्रः.

MĀLINĪMĀTṚKĀNYĀSAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 194*a* of the MS. described under No. 124, wherein this Mantra has been omitted to be included among the other works contained therein.

Complete.

This Mantra consists of the letters of the alphabet (combined with Anusvāra) which are to be repeated with the formula क्लीं ह्रीं ऐं while touching certain parts of the body.

Beginning:

अस्य श्रीमालिनीमातृकान्यासस्य दक्षिणामूर्तिः ऋषिः, अनुष्टुप् छन्दः, श्रीमालिनीमातृका देवता, ऐं बीजं, स्वाहा शक्तिः, ह्रीं कीलकं, ममेष्ट-देवताप्रीतये मालिनीमातृकान्यासे विनियोगः ।

End:

अं नमः श्रीं ह्रीं ऐं इत्यादि क्षान्तं मातृकास्थानेषु न्यसेत् ॥

Colophon:

